३५ S.K.M. 104/89(m)

श्री धर विरचिता भावार्थ दीपिका टीका

भागवत द्वादश स्कंध

समय १८३९ (M-35)

पत्र ४८

॥ पुस्तक श्रीमद्भागवतको ॥ ॥ ॥

॥ ॥ ॥ द्वादशस्कंधपत्राणि ॥ ९८ ॥

॥ महंत श्रीचैतन्यदासजी को शिष्य

॥ ॥ ॥ गंगाविष्णुदासजी पठनार्थं

भा० द्वा० ॥ श्रीगणेशाय नमः ॥ श्रीगुरुं परमानंदं वंदे आनंदविग्रहं ॥ यस्य सन्नृतिमात्रेण चिदानंदायते नरः ॥ १ ॥ जयति श्री
१ स परमानंदकृपायां गलद्दृशः । या नित्यमनुवर्त्तंते संपदो विमता हृशः ॥ २ ॥ उक्तस्त्र योदशाध्यायैर्द्वादशे त्वाश्रयः मनः अधिष्ठा
नावधित्वाभ्यामाश्रय स्वेश्वरः स ततः ॥ ३ ॥ उक्तो लयावधित्वेन प्राक्तनान्यं च केलये ॥ अधिष्ठानतया वोक्तो महापुरुषवर्ण
ने ॥ ४ ॥ तत्रादौ षड्भिरध्यायैः शुकः प्राह परीक्षिते ॥ शेषैस्तत्राखिलान्याह स्ततः प्रश्नानि सशिभिः ॥ ५ ॥ स्वोध्वयस्य वर्णे
कार्यो न विलंबो मनीषिभिः ॥ इत्यध्यकालवैयग्र्यं चतुर्भिस्तावदुच्यते ॥ ६ ॥ तत्र तु प्रथमे भाविमागधान्वयभूमिपान्

परीक्षिदुवाच ॥ स्वधामानुगते कृष्णे यदुवंशविभूषणे ॥
कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने ॥ १ ॥ ॥

कलिप्रभावतः प्राह संकरादिमलीमसान् ॥ ७ ॥ एवंभूतो सोमवंशो मुकुंदस्यैरक्रीडावर्णितातोऽस एव वंशोऽभावीव
एष्यते कृष्णभक्तिं मुक्तामुक्त्यैव वत्स्येनास्तीति वक्तुं तदेव वेव स्वतन्मनुवंशो सोमवंशप्रस्तावे तु श्रीकृष्णावतारचरिता
नि स प्रपंच मनुवर्णितानीति ॥ अथेदानिं भावी सोमवंशः ॥ कलौ विजातीयशंकरादिमलीमसो वे राज्यद्वारा श्रीकृष्णैक
भक्तिनिरामायानुवर्णितेन तत्र तु सोमवंशस्याखास्तु चिरकालानुवर्त्तितया मागधवंशोऽनुक्रम्यते ॥ तत्रैव प्रागेवंशो
नुपरिचरो वसुस्तस्य बृहद्रथस्तस्य जरासंधस्तस्य सहदेवः ॥ पुत्रोऽभूदित्युक्तं नवमस्कंधेः तत्र तु सहदेवान्मार्जा
रिस्ततः श्रुतश्रवा इत्यादि योरिपुंजयांता विंशतिभाविनो राजानो निरूपिताः ॥ तदुपरि नवंशंकरादिदोषैः प्रपंच
यति । योऽस्यति
॥ २

रिपुंजय एव पुरंजयः। स्वामिनं पुरंजयं हत्वा स्वपुत्रं प्रद्योतं राजानं करिष्यति॥ यस्य पालको नाम सुतो भविष्यति॥३॥२

श्रीशुक उवाच॥ योंत्यः पुरंजयो नाम भाविष्यो वारहद्रथः॥ तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्म
जे॥२॥ प्रद्योतसंज्ञं राजानं कर्त्ता यत्पालकः सुतः॥ विशाखयूपस्तत्पुत्रो भविता राजकस्ततः॥३॥
नंदिवर्द्धनस्तत्पुत्रः पंच प्रद्योतना इमे॥ अष्टत्रिंशोत्तरशतं भोक्ष्यंति पृथिवीं नृपाः॥४॥ शिशुनाग
स्ततो भाव्यः काकवर्णस्तु तत्सुतः॥ क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः॥५॥ विधिसारः सुतस्त
स्याजातशत्रुर्भविष्यति॥ दर्भकस्तु सुतो भावी दर्भकस्याजयः स्मृतः॥६॥ नंदिवर्द्धन आजेयो महानंदि
सुतस्ततः॥ शिशुनागा दशैवैते षष्ट्युत्तरशतत्रयं॥७॥ समा भोक्ष्यंति पृथिवीं कुरुश्रेष्ठ कलौ
नृपाः॥ महानंदिसुतो राजन् शूद्रीगर्भोद्भवो बली॥८॥ महापद्मपतिः कश्चिन्नंदः क्षत्रविनाशकृ
त्॥ ततो नृपा भविष्यंति शूद्रप्रायास्त्वधार्मिकाः॥९॥ स एकछत्रां पृथिवीमनुल्लंघितशासनः
शासिष्यति महापद्मो द्वितीय इव भार्गवः॥१०॥

द्योतनाः प्रद्योतसंज्ञाः॥४॥५॥६॥७॥८॥ नंदो नाम स च महापद्मसंख्यायाः॥ सेनायाः धनस्य वा पतिर्भविष्यति
अत एव महापद्मः तामेभिः तस्य नाम स्मृतं॥ एकमेवछत्रं यस्यां तां पृथिवीं शासिष्यति क्षत्रोत्सादने न द्वितीयः भार्ग
वः परशुराम इव॥१०॥

धर्मोनृतपराः अधर्म
संकृता गतो धानादि

ना० द्वा० २ समाः संवत्सरान् ॥ २[illegible] ॥ नवनंदान्नृपानेतान्सुतांश्चैवेत्येवं ॥ उपन्नान्विश्वस्तान्विख्याताताल्वाद्विजः कौटिल्यवात्स्यायनादि
पर्यायश्चाणक्य उद्धरिष्यति ॥ उन्मूलयिष्यति मौर्याः ॥ मौर्यसंज्ञाः ॥ २२ ॥ कथं भोक्ष्यंति ॥ तदाह स एवेति ॥ चंद्रगुप्तं

तस्य चाष्टौ भविष्यंति सुमाल्यप्रमुखाः नृपाः ॥ य इमां भोक्ष्यंति महीं राजानः स्म शतं समाः ॥ २१ ॥ नवनं-
दान्द्विजः कश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावे जगतीं मौर्या भोक्ष्यंति वै कलौ ॥ २२ ॥ स एव चंद्रगुप्तं
वै द्विजो राज्येभिषेक्ष्यति ॥ तत्सुतो वारिसारस्तु ततश्चाशोकवर्द्धनः ॥ २३ ॥ सुयशा भविता तस्य संगतः
सुयशासुतः ॥ शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति ॥ २४ ॥ शतधन्वा ततस्तस्य भविता तद्बृहद्र-
थः ॥ मौर्या ह्येते दश नृपाः सप्तत्रिंशच्छतोत्तरं ॥ २५ ॥ समा भोक्ष्यंति पृथिवीं कलौ कुरुकुलोद्वह ॥
अग्निमित्रस्ततस्तस्मात्सुज्येष्ठो भविता ततः ॥ २६ ॥ वसुमित्रो भद्रकश्च पुलिंदो भविता सुतः ॥ ततो
घोषः सुतस्तस्माद्वज्रमित्रो भविष्यति ॥ २७ ॥ ततो भागवतस्तस्माद्देवभूतिः कुरूद्वह ॥ शुंगा दशैते
भोक्ष्यंति भूमिं वर्षशताधिकं ॥ २८ ॥

मौर्येषु दशमं ॥ २३ ॥ तेषां दशमो दशार्थः ॥ पराशरादिभिरुक्तो[illegible]ऽप्यनुसंधेयस्तेन सह मौर्या हि दश सप्तत्रिंशच्छतो
त्तरं सप्तत्रिंशदुत्तरशतं समाः ॥ २४ ॥ बृहद्रथस्य सेनापतिः ॥ पुष्यमित्रो नाम स्वामिनं हत्वा राज्यं करिष्यति ॥ २५ ॥ स च शुंगा २
नां प्रथमः ॥ ततोऽग्निमित्रादयो नवेत्येवं शुंगा दश वर्षशताधिकं द्वादशाधिकं वर्षशतं ॥ २८ ॥

ततश्च मागधानां तु राजा विश्वस्फूर्जिर्नाम भविता ॥ सच एवोक्तस्तु तस्मात्परः पुरंजय इति प्रसिद्धः स नव वर्णान् ब्राह्मणा-
दीन् पुलिंदयदुमद्रकसंज्ञान् म्लेच्छप्रायान् करिष्यति ॥ अपरानिति पाठे अस्मान् पुलिंदादिसंज्ञान् वर्णान् करिष्यतीत्य-
र्थः ॥ ३४ ॥ स एव ब्रह्मक्षत्त्वा अब्रह्मभूयिष्ठाः ॥ अत एव एषु प्रचुराः सतीः प्रजाः ॥ स्थापयिष्यति ॥ पालयिष्यति ॥ सच पद्मवत्यां
पुरी ॥ अनु गंगां गंगाद्वारमारभ्य प्रयागपर्यंतं गुप्तां पालितां मेदिनीं भोक्ष्यति ॥ ३५ ॥ तदनंतरं च सौराष्ट्रादिदेशवर्तिनो द्वि-

मागधानां तु भविता विश्वस्फूर्जिः पुरंजयः ॥ करिष्यत्यपरान् वर्णान् पुलिंदयदुमद्रकान् ॥ प्रजाश्चाब्रह्म-
भूयिष्ठाः स्थापयिष्यति दुर्मतिः ॥ वीर्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि ॥ अनुगंगामाप्रयागं गुप्तां भो-
क्ष्यति मेदिनीं ॥ ३५ ॥ सौराष्ट्रावंत्याभीराश्च शूरा अर्बुदमालवाः ॥ व्रात्या द्विजा भविष्यंति शूद्रप्राया जनाधि-
पाः ॥ ३६ ॥ सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं ॥ भोक्ष्यंति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः ॥ तुल्यका-
ला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ॥ एते धर्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥ ३७ ॥ स्त्रीबालगोद्विजघ्नाश्च प-
रदारधनादृताः ॥ उदितास्तमितप्राया अल्पसत्वाल्पकायुषः ॥ ३८ ॥ असंस्कृताः क्रियाहीना रजसा तमसावृताः ॥
प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्यरूपिणः ॥ ४० ॥ तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतो राजभि-
श्च क्षयं यास्यंति पीडिताः ॥ ४१ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे प्रथमोध्यायः ॥ १ ॥

जाः व्रात्या अनुपनयनरहिता भविष्यंति ॥ ३६ ॥ अब्रह्मवर्चसः वेदाचाररहिता ॥ ३७ ॥ इमे च म्लेच्छप्राया भूभृतः तुल्यकाला न विष्यं-
ति किंच ॥ एते सर्वे अधर्मानृतपराः अधर्मे अनृते च परिनिष्ठिताः फल्गुदा अल्पदातार ॥ ३८ ॥ उदितास्तमितप्रायाः हर्षशो-
काविष्टकुलाः ॥ ३९ ॥ असंस्कृता गर्भाधानादिसंस्काररहिताः प्रजा भक्षयिष्यंति [illegible] पीडयिष्यंति ॥ ३९ ॥ किंच तन्नाथाः

ते नाथा येषां ते जनपदाः देशवर्तिनो मनुष्यास्तच्छीलाचार-
वादिनः तेषामिव शीलमाचारो वादश्च तत्कृतः ॥ ४१ ॥ द्वाद-
शे प्रथमः ॥ १ ॥

धो

ना० स्वा० ६

कान्वय
द्वितीये तु कलेर्दोषैर्नष्टावतारतः अधर्मिष्ठेतनेनस्थे पुनः कृतयुगागमः ॥१॥ कलिधर्मान्प्रपंचयति ततश्चेत्यादिना ॥२॥
धर्मन्यायव्यवस्थायां बलमेव ॥२॥ दांपत्ये पतिभावे अभिरुचिरेव हेतुर्न कुलगोत्रादिः ॥ व्यावहारिके क्रयविक्रयादौ स्त्रीत्वपुंस्त्वे
च तयोः श्रेष्ठे रतिकौशलमेव हेतुर्न कुलमाचारो वा ॥३॥ आश्रमाख्यातौ ज्ञाने लिंगमेव दंडाजिनादि केहेतुर्नत्वाचारविशे

श्रीशुक उवाच ॥ ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया ॥ कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः ॥१॥
वित्तमेव कलौ नॄणां जन्माचारगुणोदयः ॥ धर्मन्यायव्यवस्थायां कारणं बलमेव हि ॥२॥ दांपत्ये भिरुचिर्हेतुर्मायैव
व्यावहारिके ॥ स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥३॥ लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणं ॥ अवृ
त्त्या न्यायदौर्बल्यं पांडित्ये चापलं वचः ॥४॥ अनाढ्यतैवासाधुत्वे साधुत्वे दंभ एव तु ॥ स्वीकार एव चोद्वाहे स्नानमे
व प्रसाधनं ॥५॥ दूरे वार्य्ययनं तीर्थं लावण्यं केशधारणं ॥ उदरंभरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥६॥ दाक्ष्यं कु
टुंबभरणं यशोर्थे धर्म्मसेवनं ॥ एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमंडले ॥७॥ ब्रह्मविट्क्षत्रशूद्राणां यो बली
भविता नृपः ॥ प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मभिः ॥८॥ आच्छिन्नदारद्रविणा यास्यंति गिरिकाननं ॥ शाक
मूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ॥९॥ अनावृष्ट्या विनंक्ष्यंति दुर्भिक्षकरपीडिताः ॥ शीतवातातपप्रावृड्
हिमैरन्योन्यतः प्रजाः ॥१०॥ क्षुत्तृड्भ्यां व्याधिभिश्चैव संतप्स्यंते च चिंतया ॥ त्रिंशद्विंशतिवर्षाणि परमायुः
कलौ नृणां ॥११॥
षः ॥ अन्योन्यापत्तिकारणं च आश्रमादाश्रमांतरप्राप्तौ च कारणं यज्ञावदुकृदकहंसादीनामन्योन्यापत्तौ नमस्कारादिव्यवहारे का
रणं ॥ अवृत्त्या मुद्राद्यर्पणादिना सामार्थ्येन न्यायपक्षे दौर्बल्यं परात्ययः चापलं वचः बहुभाषणं ॥४॥ असाधुत्वे चो यो द्यभियोगे न प्रसा
धनं अलंकारः ॥५॥ दूरे वर्त्तमानं वार्युयनं जलाशयस्तीर्थं न तु गुरुर्वोदिः स्वार्थः पुरुषार्थः ॥६॥ आच्छिन्ना अपहता दारा द्रविणानि

श्रीभागवतटीका १२ ६

तीव्रमाणे रित्यादीनां इत्येकल्लौगतप्रायइतिपंचमेनान्वयः ह्रीयमाणेषु अल्पप्रायेषु ॥ २१ ॥ दस्युप्रायेषु चौरतुल्येषु चौर्यानृ
तवृथाहिंसाघातानां तत्पोयेषां तेषु ॥ २३ ॥ छागप्रायासु भ्रमाणतः हीरतम्ब्र अनुतातुल्यासु ॥ २४ ॥ स्थास्नुषु ॥ विद्युत्प्रायेषु
तडिद्युक्तलेषु शून्यप्रायेषु धर्मादिरहितेषु सद्मसु गृहेषु ॥ जनेषु खरधर्मिणि ङुः सहचेष्टिते कलौगतप्राये समाप्तप्रा

ह्रीयमाणेषु देहेषु देहिनां कलिदोषतः ॥ वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणां ॥ २२ ॥ पाखंडप्रचुरे धर्मे दस्यु
प्रायेषु राजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥ २३ ॥ शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु
गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बंधुषु ॥ २४ ॥ अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु ॥ विद्युत्प्राये
त्य षु मेघेषु शून्यप्रायेषु सद्मसु ॥ २५ ॥ इत्थं कलौ गतप्राये जनेषु खरधर्मिणि ॥ धर्मत्राणाय सत्वेन भगवा
नवतरिष्यति ॥ २६ ॥ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणाय साधूनां जन्म कर्मापनुत
ये ॥ २७ ॥ शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥ २८ ॥

ये ॥ २६ ॥ एतत्प्रपंचयति चतुर्भिः । चराचरगुरोः ईश्वरस्यैव धर्मत्राणे हेतुः । गुरुत्वेश्वरत्वयोरुपपादनं ॥ अखिलस्य वि
श्वस्यात्मनः करणस्येति एवंभूतस्य विष्णोर्जन्म साधूनां धर्मत्राणाय धर्मत्राणप्रयोजनमाह । कर्मापनुत्तये मोक्षाय
२७ । शंभलग्राममुख्यस्य प्रधानस्य नाम्ना विष्णुयशसो ब्राह्मणस्य भवने गृहे ॥ २८ ॥

भा० द्वा०
५

धर्मत्राणप्रकारमाह ॥ अश्वमिति ॥ असाधवो दस्यं तेयेन तमश्वमारुह्य असिना दस्यून् कोटिशो निहनिष्यतीत्युत्तरेणा
न्वयः असाधुदमनं इतिपाठे कल्किविशेषणं ॥ १९ ॥ तत्प्रपंचः आशुना शीघ्रगामिना तेन हयेन क्षौणीं विचरन् अ
णिमाद्यष्टैश्वर्ययोगिगुणाश्च सत्यसंकल्पादयः ॥ नैरन्वितः नृपलिंगच्छदः राजवेषछन्नान् ॥ २० ॥ ततश्च पुनः कृत
युगप्रवृत्तिं च कुमाह ॥ अथैति सार्द्धाभ्यां तेषां पौरजानपदानां मनांसि विशदानि भविष्यंति ॥ तत्र हेतुः वासुदेवस्यां

अश्वमाशुगमारुह्य देवदत्तं जगत्पति ॥ असिनाऽसाधुदमनमष्टैश्वर्यगुणान्वितः ॥ १९ ॥ विचरन्नाशु
क्षौण्यां हयेनाप्रतिमद्युतिः ॥ नृपलिंगच्छदो दस्यून् कोटिशो निहनिष्यति ॥ २० ॥ अथ तेषां भविशदा ष्यंति मनांसि विशि
नि वै ॥ वासुदेवांगरागातिपुण्यगंधानिलस्पृशां ॥ २१ ॥ पौरजानपदानां वै हतेष्वखिलदस्युषु ॥ २२ ॥
तेषां प्रजाविसर्गश्च स्थविष्ठः संभविष्यति ॥ वासुदेवे भगवति सत्वमूर्तौ हृदि स्थिते ॥ २३ ॥ यदावती
र्णो भगवान् कल्कि धर्मपतिर्हरिः ॥ कृतं भविष्यति तदा प्रजासूतिश्च सात्विकी ॥ २४ ॥ यदा चंद्रश्च सूर्यश्च
तथा तिष्यबृहस्पती ॥ एकराशौ समेति तदा भवति तत्कृतम् ॥ २५ ॥

गरागेणाचंदनादिनाऽतिपुण्य
गंधोऽनिलस्तं स्पृशंतीति तथा येषां ॥ २१ ॥ स्थविष्ठः स्थूलः ॥ २२ ॥ कृतयुगप्रवृत्तिमाह ॥ यदाऽवतीर्ण इति ॥ प्रजानां सू
ति ॥ २३ ॥ तदवतारकालोपलक्षणमाह ॥ यदा चंद्रश्चेति तिष्यः पुष्यः अयमर्थः ॥ चंद्रसूर्यबृहस्पतीनां यदा तु पुष्यनक्षत्रा ५
योगे तदा तत्कृतयुगं भविष्यतीति यद्यपि च प्रति द्वादशाब्दं कर्कराशौ बृहस्पतौ वर्तमाने श्रावणामावास्यासु तेषा
मेव यागो मपि पुष्ययोगः संभवति ॥ तथाऽपि तेषां सह प्रवेशोऽत्र विवक्षितः समेष्यंतीति वचनात् ॥ अतो नातिप्रस
गः ॥ २४ ॥ २५ ॥

एवं नमस्कंधमारभ्यानुक्रांतं वैवस्वतमनोर्वंशद्वयं निगमयते ॥ येऽतीता इति ॥ उद्देशतः संक्षेपतः ॥ २५ ॥ कलियुगावांतरविशेषेव
क्तुमाह आरभ्येत्यादिना ॥ वर्षसहस्रं पंचदशोत्तरं शतं चेति कायाऽपि विवक्षयाऽवांतरसंख्येयं ॥ वस्तुतः परीक्षितो द्वयोरंतरं छाभ्या
मूनं वर्षाणां सार्द्ध सहस्रं भवतीयतः ॥ परीक्षित्समकालं मागधं मार्जारिमारभ्यारिपुंजयांतं विंशतिराजानः सहस्रं संवत्सरं भोक्ष्यं
ती सुकं नवमस्कंधे येवाहे इत्थभूपाला भाव्याः साहस्रवत्सरमिति ॥ ततः परं च प्रद्योतनाम्न स्थविराशाष्ठतं ॥ शिशुनागाश्च षष्ठयुत
रशतत्रयं भोक्ष्यंति पृथिवीमित्यत्रैवोक्तत्वात् ॥ २६ ॥ कलेः प्रवृत्ति वृद्धिं वा निरूपयितु कालज्ञानोपलक्षणमाह ॥ सप्तर्षीणां त्वित

येऽतीता वर्त्तमाना ये भविष्यंति च पार्थिवाः ॥ ते तत्रोद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः ॥ २५ ॥ आरभ्य भवतो
जन्म यावन्नंदाभिषेचनं ॥ एतद्वर्षसहस्रं तु शतं पंचदशोत्तरं ॥ २६ ॥ सप्तर्षीणां तु यौ पूर्वौ दृश्येते उदितौ दि
वि ॥ तयोस्तु मध्ये नक्षत्रं दृश्यते यत्समं निशि ॥ २७ ॥ तेनैव ऋषयो युक्तास्तिष्ठंत्यब्दशतं नृणां ॥ ते त्वदीये
द्विजाः काल अधुना चाश्रिता मघां ॥ २८ ॥

अथ सप्तर्षयः शाकटाकारं तारासप्तकं सप्तर्षिमंडलं तच्च किंचिदुन्नते प्रागग्रस्थानीयो मरीचिः ॥ ततः पश्चात्सानाम युगकं
धराकारो वसिष्ठः सभार्यः ततः पश्चात् ईषदुन्नते पाश्चात्यस्थानीयो गिराः ततः पश्चाच्चतुरस्रताराचतुष्के ईशान्ये त्रिः ॥
ततो दक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः ॥ पुलहस्ततनुत्तरतः क्रतुः एवं स्थिते तेषां मध्ये यो पूर्वौ उदयसमये ॥ प्रथममु
दितौ पुलहक्रतुसंज्ञौ तयोस्तु मध्ये तयोस्तु पूर्वयोस्तु मध्ये यत्समं दक्षिणोत्तरः समदेशावस्थितमश्विन्यादिषु यन्नक्षत्रं मन
क्षत्रं दृश्यते ॥ २७ ॥ तेन तथैव युक्तास्नृणामब्दशतानि तिष्ठंति ते वाद्विजास्त्वदीये काले धुना मघा आश्रिता वर्त्तंते ॥ २८ ॥

भा० द्वा०
६६

यदा विष्णोर्भानुः भातीति भानुः शुद्धसत्वात्मको देहः दिवं वैकुंठं गतः तदा कलिर्युगमविशत् यस्मिन् युगे जनः पापे रमते इति कलियुगस्य लक्षणं ॥२९॥ ननु श्रीकृष्णे पृथिव्यां वर्तमानेऽपि संध्यारूपेण कलिः प्रविष्ट एवासीत् ॥ सत्यं तथापि तावत्तस्य पराक्रमो नाभवदित्याह यावदिति ॥ पराक्रांतुमभिभवितुं ॥३०॥ अतो यथोक्त एव कलिप्रवेशकाल इत्याह यदा देवर्षय इति दिव्येन मानेन संध्यांशाभ्यां सह द्वादशशतात्मकः ॥ सलिकलिः तदा संध्यामतिक्रम्य प्रविष्ट इत्यर्थः ॥३१॥ कलेः प्रवेशकालमुक्त्वा तस्य वृद्धिकालमाह यदेति ॥ तदा प्रद्योतनात्प्रभृति वृद्धिं गच्छन् नंदात्प्रभृति वृद्धिं गमिष्यतीत्यर्थः ॥३२॥

विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः ॥ तदाविशत्कलिर्लोकं पापे यद्रमते जनः ॥२९॥ यावत्स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः ॥ तावत्कलिर्वै पृथिवीं पराक्रांतुं न चाशकत् ॥३०॥ यदा देवर्षयः सप्त मघासु विचरंति हि ॥ तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः ॥३१॥ यदा मघाभ्यो यास्यंति पूर्वाषाढां महर्षयः ॥ तदा नंदात्प्रभृत्येषः कलिर्वृद्धिं गमिष्यति ॥३२॥ यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि ॥ प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः ॥३३॥ दिव्याब्दानां सहस्रांते चतुर्थे तु पुनः कृतं ॥ भविष्यति यदा नॄणां मन आत्मप्रकाशकं ॥३४॥ इत्येष मानवो वंशो यथा संख्यायते भुवि ॥ तथा विट्शूद्रविप्राणां तास्ता ज्ञेया युगे युगे ॥३५॥

ननु यदा कलेर्लिंगमुपलक्ष्यं तदैव प्रविष्ट इति युक्तं ततः पूर्वमेव प्रवेशः ततः परं वृद्धिरित्यत्र किं प्रमाणं तत्राह ॥ यस्मिन्निति ॥ प्रपन्नं प्रविष्टमिति ज्ञातं ॥ पुराविदः सर्वज्ञातारः ॥३३॥ कलेरनंतरं कृतयुगप्रवेशमाह दिव्याब्दानामिति ॥ चतुर्थे कलौ प्रवेशनास्यपरिमितेनांशेनापि सहातीते सतीत्यर्थः ॥ कृतयुगप्रवेशचिह्नमाह ॥ यदा नॄणां मन आत्मप्रकाशकं भविष्यति ॥ तदेति ॥३४॥ राजवंशोक्तां स्थितिं ॥ ब्राह्मणादिवंशेष्वप्यतिदिशति ॥ इत्येष इति ॥ यथायाभिः उच्चनीचावस्था ६६

एतत्कीर्तनस्य वैराग्योपयोगितामाह ॥ एतेषामिति ॥ नामैव लिंगं ज्ञापकं येषां तेषां कथामात्रावशिष्टानां कीर्तिरेव स्थिता न तु राज्यं पुत्रा देहो वा ॥३६॥ कलौ विच्छिन्नानां रघुवंशादीनां पुनः प्रवृत्तिप्रकारमाह देवापिः ॥ सोमवंशजः ॥ मरुस्तु सूर्यवंशजः कलापग्रामो नाम योगिनामावासः प्रसिद्धः ॥३७॥३८॥ एवमेव प्रकारं प्रवृत्तियुगं दर्शयति ॥३९॥ येषां नामलिंगानामित्यादि यदुक्तं तत्प्रपंचयति ॥ राजन्निति पंचभिः ॥४०॥ ममत्वं कृत्वा मनेन स्वविनाश भूतद्रोह प्रवृत्तिर्निंदति ॥ कृमीति ॥ राजेति नाम यस्य तस्यापि देहस्यांते कृमयो विड् भस्मेति वा संज्ञा भविष्यति ॥ तत्कृते तन्निमित्तं यो भूतध्रुक् भूतेभ्यो द्रुह्यति स किं स्वार्थं वेद कुत इत्यये

एतेषां नामलिंगानां पुरुषाणां महात्मनां ॥ कथामात्रावशिष्टानां कीर्तिरेव स्थिता भुवि ॥३६॥ देवापिः शंतनोर्भ्राता मरुश्चेक्ष्वाकुवंशजः ॥ कलापग्राम आसाते महायोगबलान्वितौ ॥३७॥ ताविहैत्य कलेरंते वासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतं धर्मं पूर्ववत्प्रथयिष्यतः ॥३८॥ कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं ॥ अनेन क्रमयोगेन भुवि प्राणिषु वर्त्तते ॥३९॥ राजन्नेते मया प्रोक्ता नरदेवास्तथापरे भूमौ ममत्वं कृत्वांते हित्वेमां निधनं गताः ॥४०॥ कृमिविड्भस्मसंज्ञांते राजनाम्नोपि यस्य च ॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ॥४१॥ कथं सेयमखंडा भूः पूर्वैर्मे पुरुषैर्धृता ॥ मत्पुत्रस्य च पौत्रस्य मत्पूर्वा वंशजस्य वा ॥४२॥ तेजोबन्नमयं कायं गृहीत्वात्मतयाबुधाः ॥ महीं ममतया चोभौ हित्वांतेऽदर्शनं गताः ॥४३॥

तायां हेतुत्वेन भूतद्रोहं विशिनष्टि यतो भूतद्रोहान्निरयो भवतीति ॥४१॥ ममत्वप्रकारं प्रपंचयति ॥ कथमिति सेयमखंडा भूमे पूर्वजैः पुरुषैर्धृता सा तादृ[illegible]दानीमस्य वा सती मत्पुत्रादेः कथं स्यादिति ॥४२॥ उभौ महीकायौ च इत्थं तं मत्स्तु ॥४२॥ उपसंहरति यायइति ॥ ते सर्वे च कथासु क्रियमाणासु कथामात्राः कालेन कृताः ॥४३॥

भा० द्वा०
७

॥इति द्वादशे द्वितीयोध्यायः॥ तृतीये भूमिगीतैः अगत्यदोषादिवर्ण्यते॥ कलौ च दोषभूयिष्ठे दोषहं श्रीहरेर्नाम। देहेऽहं
तां भूमौ च ममतां कुर्वन्तो बुधाः स्युरिति॥ तदेव भूमिगीतैः प्रपंचयति। दृष्ट्वेत्यादिना आत्मनि एथिव्यां जये व्यग्रानुद्युक्तान्॥
हास्यप्रकारमेवाह॥ अहो इति येन फेनोपमे पिंडे देहे विस्रंभिता विश्वासं नीता ये ते सां नरेंद्राणां स एव कामो मोघ एव स्यात्। २। काममेते

ये ये भूपतयो राजन्भुंजन्ति भुवमोजसा॥ कालेन ते कृताः सर्वे कथामात्राः कथासु च ॥४१॥ इति श्रीभागवते महा
पुराणे द्वादशस्कंधे द्वितीयोध्यायः॥२॥ श्रीशुक उवाच॥ दृष्ट्वात्मनि जये व्यग्रान्नृपान्हसति भूरियं॥ अहो
मां विजिगीषंति मृत्योः क्रीडनका नृपाः॥ काम एष नरेंद्राणां मोघः स्याद्विदुषामपि॥ येन फेनोपमे पिंडे ये
ति विस्रंभिता नृपाः। १॥ पूर्वं निर्जित्य षड्वर्गं जेष्यामो राजमंत्रिणः॥ ततः सचिवपौराप्तकरीन्द्रानस्य कंटकान्
३॥ एवं क्रमेण जेष्यामः पृथिवीं सागरमेखलां॥ इत्याशाबद्धहृदया न पश्यंत्यंतिकेंतकं। ४॥ समुद्रावरणां
जित्वा मां विशंत्यब्धिमोजसा॥ कियदात्मजयस्यैतन्मुक्तिरात्मजये फलं॥ यां विसृज्यैव मनवस्तत्सुताश्च कुरू
द्वह॥ गता यथागतं युद्धे तां मां जेष्यंत्यबुद्धयः। ६॥

वदर्शयति द्वाभ्यां॥ इंद्रियाण्येव षड्वर्गं तं निर्जित्य राजमंत्रिणो जेष्यामः वशीकरिष्यामः सचिवा अमात्याः करींद्रा हस्तिपास्तान् शत्रु जेष्याम
कंटकान् घातिपक्षाने अस्य अपास्य अस्य कंटकानिति पाठः॥ ३ इति एवं केवलाशाबद्धहृदया। ४। एवं कंचित्सुन मां जि
त्वा पतित् स्नया अब्धिं विशंति॥ तदेव मिंद्रियजयेन येरात्मसाधयितुमिच्छंति ते नि मंदा इत्याह कियदिति। ५॥ अतः अ
बकं नपश्यतीत्युक्तं तदेवाह॥ यामिति॥ कुरूद्वहेति भूमिगीतं कथयन्नमुकः संबोधयति॥ कुलोद्वह इति पाठः सुगमः। ६॥ ७

अबुद्ध्य इत्युक्तं तस्य पंचयति ॥ मत्कृत इति ॥ ७ ॥ ८ ॥ रामो नाम कश्चिद्राजा यश्च लोकरंजनात् रामत्वेन न निर्दिष्टः ॥ ९ ॥ १० ॥
लोकरावयति रोदयतीति लोकरावणः ॥ ११ ॥ मयि उच्चैर्ममतां कृत्वा ये अवर्त्तंत ते कालेन कथावशेषाः । कृताः विभो इति सं

मत्कृते पितृपुत्राणां भ्रातॄणां चापि विग्रहः ॥ जायते ह्यसतां राज्ये ममताबद्धचेतसां ॥ ७ ॥ ममैवेयं मही कृ
त्स्ना न ते मूढेति वादिनः स्पर्द्धमाना मिथो घ्नंति म्रियंते नृपाः ॥ ८ ॥ पृथुः पुरूरवा गाधिर्नहुषो भरतोऽ प्रवुद्धा २
र्जुनः ॥ मांधाता सगरो रामः खट्वांगो धुंधुहा रघुः ॥ ९ ॥ तृणविंदुर्ययातिश्च शर्यातिः शंतनुर्गयः ॥ भगी
रथः कुवलयाश्वः ककुत्स्थो नैषधो नृगः ॥ १० ॥ हिरण्यकशिपुर्वृत्रो रावणो लोकरावणः ॥ नमुचिः शंब
रो भौमो हिरण्याक्षोऽथ तारकः ॥ ११ ॥ अन्ये च बहवो दैत्या राजानो ये महेश्वराः ॥ सर्वे सर्वविदः शूराः सर्वे स
र्वजितोऽजिताः ॥ १२ ॥ ममतां मय्यवर्त्तंत कृत्वोच्चैर्मर्त्यधर्मिणः ॥ कथावशेषाः कालेन ह्यकृतार्थाः कृता वि
भो ॥ १३ ॥ कथा इमास्ते कथिता महीयसां वितायलोकेषु यशः परेयुषां ॥ विज्ञानवैराग्यविवक्षया विभो वचो
विभूतीर्न तु पारमार्थ्यं ॥ १४ ॥ यस्तूत्तमश्लोकगुणानुवादः संगीयतेभीक्ष्णममंगलघ्नः ॥ तमेव नित्यं शृ
णुयादभीक्ष्णं कृष्णेऽमलां भक्तिमभीप्समानः ॥ १५ ॥

बोधनं कुरु इहेति वत् ॥ १३ ॥ ॥ राजवंशानुकथनस्या
तात्पर्यमाह ॥ कथा इति विज्ञानं विषयासारताज्ञानं ॥ ततो वैराग्यं । तयोर्विवक्षया । परेयुषां मृतानां ॥ वचोविभूतीः वा
ग्विलासमात्ररूपो पारमार्थ्यं परमार्थयुक्तं कथनं न भवतीत्यर्थः ॥ १४ ॥ कस्तर्हि पुरुषाणामुपादेयः परमार्थः तमा
ह यस्त्विति नित्यं प्रत्यहं तत्रापि अभीक्ष्णं ॥ १५ ॥

भा० द्वा०
८

कलिदोषो यत्र सतिभक्तेरसंभवं मन्यमानः पृच्छति ॥ केनोपायेनेति विधमिष्यंति नाशयिष्यंति ॥ यस्माय यावत ॥१६॥
कलियुगेऽकः परमो धर्म इति विभुक्तस्यापृच्छति युगानीति ब्रूहीत्यनुषंगः ॥ आसंतिकजिज्ञासया पुनः पृच्छति

श्रीराजोवाच ॥ केनोपायेन भगवन् कलेर्दोषान् कलौ जनाः ॥ विधमिष्यंत्युपचितांस्तन्मे ब्रूहि यथा मु-
ने ॥१६॥ युगानि युगधर्मांश्च मानं प्रलयकल्पयोः ॥ कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः ॥१७॥
श्रीशुक उवाच ॥ कृते प्रवर्त्तते धर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यं दया तपो दानमिति पादा विभोर्नृ-
प ॥१८॥ संतुष्टाः करुणा मैत्राः शांता दांतास्तितिक्षवः ॥ आत्मारामाः समदृशः प्रायशः श्रमणा ज-
ना ॥१९॥ त्रेतायां धर्मपादानां तुर्यांशो हीयते शनैः ॥ अधर्मपादैरनृतहिंसासंतोषविग्रहैः ॥२०॥
तदा क्रियातपोनिष्ठा नातिहिंस्रा न लंपटा ॥ त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप ॥२१॥

प्रलयकल्पयोः संहारस्थितिकालयोः ॥ न चायं वहिर्मुखः प्रश्न इत्याह ॥ कालस्येति ॥१७॥ तत्र युगधर्मांस्तावदा-
ह ॥ कृत इति ॥ तज्जनैस्तत्कालीनैर्जनैः ॥ दानमत्र रागद्वेषतया अभयदानं तदेव शश्वमंत्के धे शौचशास्त्रेनोक्तौ
विभोः संपूर्णस्य धर्मस्य ॥१८॥ तदानीतनजनानाह ॥ संतुष्टा इति मैत्राः भूतमैत्रीयुक्ताः श्रमणाः आत्माभ्यासवं-
तः ॥१९॥२०॥ ब्रह्मोत्तराः ब्राह्मणाधिकाः ॥२१॥ ८

अनृतेन सत्यं हिंसया दयां असंतोषेण तपः विग्रहेण दानमिति यथासंख्ययोज्यं ॥ हिंसातुष्ट्यनृतद्वेषैरित्ययं क्रमो न विवक्षि
तः धर्मस्यांघ्रिः क्रमतिर्हीयते । अधर्मस्य लक्षणैः विवृद्धैः पादैरित्यर्थः ।२२। यत्रास्थिनः कीर्तिप्रियाः क्षत्रद्विजोत्तमाः क्षत्रियशाद्युगण
प्रधानाः कलौ धर्मपादानां तुर्यांशः चतुर्थोऽवशिष्यते ।२४। स्त्रीशूद्रासोत्तराः शूद्रमकेवलोदिप्रधानाः ।२५। युगानामेवं स्मृत वैष

तपःसत्यदयादानेष्वर्द्धं ह्रसति द्वापरे ॥ हिंसातुष्ट्यनृतद्वेषैर्धर्मस्याऽधर्मलक्षणैः ॥२२॥ यशस्विनो महाशी
लाः स्वाध्यायाध्ययने रताः ॥ आढ्याः कुटुंबिनो हृष्टा वर्णाः क्षत्रद्विजोत्तमाः ॥२३॥ कलौ तु धर्महेत्वनां तुर्यां
शोऽधर्महेतुभिः ॥ एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति ॥२४॥ तस्मिन् लुब्धा दुराचारा निर्दयाः ।
शुष्कवैरिणः दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥२५॥ सत्वं रजस्तम इति दृश्यंते पुरुषे गुणाः ॥ का
लसंचोदितास्ते वै परिवर्तंत आत्मनि ॥२६॥ प्रभवंति यदा सत्वे मनोबुद्धींद्रियाणि च ॥ तदा कृतयुगं विद्याज्ज्ञा
ने तपसि यद्रुचिः ॥२७॥ यदा कर्मसु काम्येषु भक्तिर्भवति देहिनां ॥ तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ॥२
८॥ यदा लोभस्त्वसंतोषो मानो दंभोऽथ मत्सरः ॥ कर्मणां चापि काम्यानां द्वापरं तद्रजस्तमः ॥२९॥ यदा मायानृतं
तंद्रा निद्रा हिंसा विषादनं ॥ शोको मोहो भयं दैन्यं स कलिस्तामसः स्मृतः ॥३०॥

ष्वकारणमाह । सत्वमिति पंचभिः ॥२६॥ मनश्च बुद्धिश्चेंद्रियाणि च सत्वे यदा प्रभवंति समर्था भवंति तेन वर्त्तंते ॥२७॥ यदा कर्मादिषु भक्तिः
प्रीतिस्तदा रजोवृत्तिप्रधानं त्रेतायुगमिति जानीहि ॥२८॥ काम्यानां कर्मणां विषये यदा प्रीतिः तत्तदा रजस्तमःप्रधानं द्वापरं ज्ञा

श्री । रघो । विषादनं: स्कं ३ । ३०॥

ना० द्वा०
२

कलिदोषानेवप्रपंचयति ॥ यस्मादित्यादिना ॥ यस्मात्कलेर्हेतोः क्षुद्रदृशः मंदमतयः क्षुद्रभाग्याः। अल्पभाग्याः महाशनाबह्वा
हाराः वित्तहीना अपि कामिनः स्वैरिण्यः पुंश्चल्यः असतीः असत्यः ॥३२॥ दस्यवः उत्कृष्टाः प्रचुरा येषु ते ॥३३॥ अव्रता विहिताचारा
श्रमाः अशौचाः शौचसन्त्यागाश्च वटवो ब्रह्मचारिणो भविष्यंति ॥ कुटुंबिनश्च गृहस्थास्ते स्वयं भिक्षाटनपरा भविष्यंति न तु भिक्षा
दास्यंति तपस्विनो वनस्थाः। वनं हित्वा ग्रामवासा भविष्यंति न्यासिनो यतयः अतिलोलुपा भविष्यंति ॥३४॥ पुनरपि स्त्रीणां स्वभावमा

यस्मात्क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः ॥ कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥३२॥ दस्यूत्कृष्टा
जनपदा वेदाः पाषंडदूषिताः राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥३३॥ अव्रता वटवोऽशौचा भिक्षवश्च
कुटुंबिनः तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ॥३४॥ ह्रस्वकाया महाहारा भूर्यपत्या गतह्रियः शश्व
त्कटुकभाषिण्यः चौर्यमायोरुसाहसाः ॥३५॥ पणयिष्यंति वै क्षुद्राः किराटाः कूटकारिणः अनापद्यपि मंस्यं
ते वार्त्तां साधु जुगुप्सितां ॥३६॥ पतिं त्यक्ष्यंति निर्द्रव्यं भृत्या अप्यखिलोत्तमं ॥ भृत्यं विपन्नं पतयः कौलं गाश्चा
पयस्विनीः ॥३७॥ पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः ॥ ननंदृश्यालसंवादा दीनास्त्रैणाः कलौ नराः ।
॥३८॥

ह ॥ ह्रस्वकाया इति कटुकभाषिण्यः। अप्रियवादिन्यः चौर्यं च माया च कपटं। उरुसाहसं यासां ताः ॥३५॥ किंच किराटा व
णिजः पणयिष्यंति कूटक्रयविक्रयादिव्यवहारं प्रवर्त्तयिष्यंति ॥ किंच सर्वे जनाः अनापद्यपि जुगुप्सितां निंदितां वार्त्तां वृत्तिं साधु
मंस्यंते ॥३६॥ सर्वोत्तममपि तद्व्यहीनं भृत्यास्त्यक्ष्यंति। यतयश्च विपन्नं रोगादिभिर्व्यापारासमं ॥ कौलं कुलपरंपराप्राप्तं त्य
जंति। अपयस्विनीः दुग्धदोहाः ॥३७॥ सौरतं सुरतनिमित्तं सौहृदं येषां ते अत एव ननंदारो भार्याभगिन्यः श्यालाः भार्याभ्रातर

॥२६॥

पिशाचसंदर्शनाः पिशाचवद्दृश्याः ॥४१॥ काकिणिके विंशतिवराटकमात्रेऽप्यर्थे विषयभूते विग्रह्य वैरं कृत्वा ॥४२॥ महांतं मनएषेमा
हृशाभ्यां कलाविति त्रिलोकनाथैरवनतं नमस्कृतं पादपद्मं यस्य तं न यक्ष्यंति न याजयिष्यंति ॥ पाषंडैर्विभिन्नमन्यथाकृतं चेतो येषां

शूद्राः प्रतिग्रहीष्यंति तपोवेषोपजीविनः ॥ धर्मं वक्ष्यंत्यधर्मज्ञा अधिरुह्योत्तमासनं ॥३९॥ नित्यमुद्विग्नम
नसो दुर्भिक्षकरकर्शिताः ॥ निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥४०॥ वासोन्नपानशयनव्यवायस्ना
नभूषणैः ॥ हीनाः पिशाचसंदर्शा भविष्यंति कलौ प्रजाः ॥४१॥ कलौ काकिणिकेप्यर्थे विग्रह्य त्यक्तसौहृदाः
त्यक्ष्यंति हि प्रियान्प्राणान्हनिष्यंति स्वकानपि ॥४२॥ न रक्षिष्यंति मनुजाः स्थविरौ पितरावपि ॥ पुत्रान्सर्वा
र्थकुशलान्क्षुद्राः शिश्नोदरंभराः ॥४३॥ कलौ न राजन्जगतां परं गुरुं त्रैलोक्यनाथानतपादपंकजं ॥ प्रायेण
मर्त्या भगवंतमच्युतं यक्ष्यंति पाषंडविभिन्नचेतसः ॥४४॥ यन्नामधेयं म्रियमाण आतुरः पतन्स्खलन्वा
विवशो गृणन्पुमान् ॥ विमुक्तकर्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यंति न तं कलौ जनाः ॥४५॥ पुंसां कलिकृता
न्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरति चित्तस्थो भगवान्पुरुषोत्तमः ॥४६॥ श्रुतः संकीर्तितो ध्यातः पू
जितश्चादृतोपि वा ॥ नृणां धुनोति भगवान्हृत्स्थो जन्मायुताशुभं ॥४७॥

ते ॥४४॥ विवशो गृणन्न विमुक्ताः कर्मरूपाः अर्गलाः प्रतिबंधा यस्य सः ॥४५॥ तदेवं कलिदोषानुपपंच्य प्रस्तुतं तन्निस्ता
रोपायमाह ॥ पुंसामिति षड्भिः द्रव्यदेशात्मभिः संभवो येषां तान् चित्तस्थः चित्ते स्फुरितः ॥४७॥

भा० द्वा०
१०

अथ यमेवोपायो नान्य इति सदृष्टान्तमाह॥ यथेति। धातुजं ताम्रादि संश्लेषजातं हेम्नो दुर्वर्णं मालिन्यं तत्र स्थितो वह्निरेव हर
ति न तु तैलादि एवं योगिनामपि विष्णुरेव न तु योगादिकमित्यर्थः।४८। एतदेव विवृणोति। विद्येति। विद्या देवतोपासना। आ
त्मभावं स्वस्वरूपं।४९।५१। इदानीं कलिं स्तौति द्वाभ्यां। कलेर्दोषनिधेरानिति। तत्सर्वं हरिकीर्तनादेव कलौ भवति।५२।५३॥
द्वादशे तृतीयोध्यायः॥३॥ चतुर्थे च चतुर्धोक्ता कालयानैमित्तिकादयः तत्र संसारनिस्तारो हरिकीर्त्यैव वर्ण्यते। कलिदोषनिवर्तकं ह

यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हन्ति धातुजं॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयं।४८। विद्यातपःप्राणनिरो
धमैत्रीतीर्थाभिषेकव्रतदानजप्यैः॥ नात्यंतशुद्धिं लभतेंतरात्मा यथा हृदिस्थे भगवत्यनंते॥४९। तस्मात्सर्वात्म
नाराजन्हृदिस्थं कुरु केशवं॥ म्रियमाणो ह्यवहितस्ततो यासि परां गतिं।५०। म्रियमाणैरभिध्येयो भगवान्परमे
श्वरः॥ आत्मभावं नयत्यंग सर्वात्मा सर्वसंश्रयः।५१। कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः॥ कीर्तना
देव कृष्णस्य मुक्तबंधः परं व्रजेत॥५२। कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः॥ द्वापरे परिचर्यायां कलौ
तद्धरिकीर्तनात्॥५३॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे तृतीयोध्यायः॥३॥ श्रीशुक उवाच॥
कालस्ते परमाण्वादिर्द्विपरार्धावधिर्नृप॥ कथितो युगमानं च शृणु कल्पलयावपि॥१॥

रिनामसंकीर्तनादिकं स एव च कलौ परमो धर्म इति प्रसंगतः स्पोत्तरमुक्तं॥ युगमानस्य संप्रलयकल्पयोर्मानं ब्रूहीति॥ तदिदा
नीं तृतीयस्कंधोक्तकालानुवादपूर्वकं निरूपयति कालस्त इति स कालः परमाणुर्वै यो भुंक्ते परमाणुतामित्यादिना कालः॥ कथितः १०
चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि चेति युगमानं च कथितं॥१॥

तत्रकल्पमानमाह॥ चतुर्युगेति यत्रचतुर्दशमनवः क्रमेणभवंति १ प्रलयस्तुचतुर्विधः नैमित्तिकः प्राकृतिकआत्यंतिको
नित्यश्चेति॥ तत्रनैमित्तिकप्रलयंमानसहितमाह॥ तदंतइतिद्वाभ्यांतावानचतुर्युगसहस्रप्रमाणः सैवब्राह्मीरात्रिः ३ नैमि
त्तिकत्वंदर्शयति॥ यत्रयदाविश्वसृक्श्रीनारायणः विश्वमात्मसात्कृत्यस्वस्मिन्नुपसंहृत्यशेते आत्मभूः ब्रह्माचतस्मि-

चतुर्युगसहस्रंचब्रह्मणोदिनमुच्यते॥ सकल्पोयत्रमनवश्चतुर्दशविशांपते॥ २ तदंतेप्रलयस्तावान्ब्राह्मीरा
त्रिरुदाहृता॥ त्रयोलोकाइमेयत्रकल्पंतेप्रलयायहि॥ ३॥ एषनैमित्तिकःप्रोक्तःप्रलयोयत्रविश्वसृक्॥ शे
तेनंतासनोविश्वमात्मसात्कृत्यचात्मभूः॥ ४॥ द्विपरार्द्धेत्वतिक्रांतेब्रह्मणःपरमेष्ठिनः॥ तदाप्रकृतयःस-
प्तकल्पंतेप्रलयायवै॥ ५॥ एषप्राकृतिकोराजन्प्रलयोयत्रलीयते॥ आंडकोशस्तुसंघातोविघातउपसादि
ते॥ ६॥ पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति॥ तदानिरन्नेह्यन्योन्यंभक्ष्यमाणाःक्षुधार्दिताःक्षयंयास्यं
तिशनकैःकालेनोपद्रुताःप्रजाः॥ ७॥ सामुद्रंदैहिकंभौमंरसंसांवर्त्तकोरविः॥ रश्मिभिःपिबतेघोरैःसर्वंनैववि
मुंचति॥ ८॥

न्शेतेतनयोरभेदविवक्षयाब्रह्मणएवानंतासनत्वमुक्तं ब्रह्मणोनिद्रांनिमित्तीकृत्यप्रवर्त्तमानोलोक
त्रयप्रलयोनैमित्तिकइत्यर्थः॥ ४॥ प्राकृतिकंप्रलयमाहद्वाभ्यांद्विपरार्द्धेब्रह्मणआयुषि॥ सप्तप्रकृतयः महदहंकार
पंचतन्मात्राणि ५ संघातः महदादिकार्यभूतः प्रकृतीनांतुकार्यंब्रह्मांडइत्यचलयातप्राकृतइत्यर्थः॥ विघातकारणेनु
पसादितेसति ६ तदेवाहपर्जन्यइत्यादिनावृद्धिर्हियादिरूपेणोत्पतः प्राक्तनेनग्रंथेन ७ सामुद्रादिकंसंवर्तरविःपिब
तेआकर्षति ८॥

भा० द्वा०
११

अनिलवेगोत्थः वायुवेगोद्भूतः॥ अनिलेवेगोवा इति पाठे अनिलेनवेगो यस्य सः॥ वाः रविणा रश्मिभिः पीतमुदकं
चदहतीत्यर्थः। अनिलवेगोवै इतिस्तुपाठः सुगमः भूविवरान् यातालादीन् शून्यान् रविणा देहिकरसाकर्षणान् प्राणि

ततः संवर्त्तकोवह्निः संकर्षणमुखोत्थितः॥ दहत्यनिलवेगोत्थः शून्यान्भूविवरानथ॥ उपर्यधः
समंताच्च शिखाभिर्वह्निसूर्ययोः। दह्यमानं विभात्यंडं दग्धगोमयपिंडवत् १०॥ ततः प्रचंडपवनो
वर्षाणामधिकं शतं॥ परः संवर्त्तकोवाति धूम्रं खं रजसावृतं ११॥ ततोमेघकुलान्यंग चित्रवर्णा
न्यनेकशः॥ शतं वर्षाणि वर्षंति नदंति रभसस्वनैः॥ तत एकोदकं विश्वं ब्रह्मांडविवरांतरम् १२॥
तदाभूमेर्गंधगुणं ग्रसंत्याप उदप्लवे॥ ग्रस्तगंधा तु पृथिवी प्रलयत्वाय कल्पते १३॥

रहितान् शिखाभिर्ज्वालाभिः। १०। किंचिदधिकं वर्षाणां शतं संवर्त्तकः। परो वायुर्वाति तदा रजसावृतं खं धूम्रं भवति। ११।
रभसस्वनैः॥ तीव्रगर्जितैः। ब्रह्मांडविवरांतरं ब्रह्मांडविवरमध्यगतं विश्वं एकोदकं एकार्णवोदकव्याप्तं भवति। १२। उदप्लवे ११
उदकेनाऽऽप्लाविते सति॥ प्रलयत्वाय अभावाय। १३॥

भूतादिस्तामसोहंकारः गुणैर्वृत्तिभिः सह ।२६॥ अव्याकृतं प्रधानं ॥२७। तस्य तुल्ययोर्नास्तीत्याह । नतस्येति । कालावयवैः अहो
रात्रादिभिः गुणाः भावविकाराः परिणामः विपरिणामः अव्यक्ते अस्ति न विकारश्च स्मान्नित्यं सद्बुद्धेरेकरूपं ह्रासवृद्धिरहितं तस्मि
न्नेषः अव्ययं अपक्षयशून्यं सर्वत्र हेतुः कारणमिति ।२८। किंच वागादिगोचरस्य विश्वस्य विकारा भवंति । इदं तु न तथेत्याह

अपां रसमथो तेजस्ताभिर्लीयंतेथ नीरसाः ॥ ग्रसते तेजसो रूपं वायुस्तद्रहितं तदा ॥२४॥ लीयते चानिले तेजो
वायोः खं ग्रसते गुणं । स वै विशति खं राजंस्ततश्च नभसो गुणं ॥२५। शब्दं ग्रसति भूतादिर्नभस्तमनुलीयते
तैजसश्चेंद्रियाण्यंग देवान्वैकारिको गुणैः ।२६। महान्ग्रसत्यहंकारं गुणाः सत्वादयश्च तं ॥ ग्रसतेव्या
कृतं राजन्गुणान्कालेन चोदितं ॥२७। न तस्य कालावयवैः परिणामादयो गुणाः ॥ अनाद्यनंतमव्यक्तं नि
त्यं कारणमव्ययं ।२८॥ न यत्र वाचो न मनो न सत्वं तमो रजो वा महदादयोमी ॥ न प्राणबुद्धींद्रियदेवता वा
न संनिवेशः खलु लोककल्पः ।२९। न स्वप्नजाग्रन्न च तत्सुषुप्तं न खं जलं भूरनिलोग्निरर्कः ॥ संसुप्तवच्छून्य
वदप्रतर्क्यं तन्मूलभूतं पदमामनंति ॥२०। लयः प्राकृतिको ह्येषः पुरुषाव्यक्तयोर्यदा । शक्तयः संप्रलीयंते वि
वशाः कालविद्रुताः ।२२॥

न यत्रेति द्वाभ्यां लोककल्पः लोकरूपः संनिवेशो रचना विशेषः ।२९॥ स्वप्नजागराववस्था
युक्तं सुषुप्तवत् इंद्रियाभावात् ॥ शून्यसादृश्ये हेतुः । अप्रतर्क्यं न पुनः शून्यमेवेत्याह । उपसंहरति लय इति । शक्तयः ॥
सत्वादयः ।२२। आत्यंतिकलयमाह । बुद्धींद्रियेति द्वादशभिः आत्यंतिकलयो मोक्षः स च ब्रह्मज्ञानेन सर्वप्रपंचलया

स्यात्मवत्सत्यत्वेन त्वयुः संभवतीति ज्ञानरूपात् ब्रह्मणः पृथक्भूतस्य तस्यासत्त्वमुपपादयति ॥ बुद्धिश्चइंद्रियाणि च अर्थाश्चेत्येवं ग्रा
हककरणग्राह्यरूपेण तेषामाश्रयणं ज्ञानमेव भाति न पृथक् तत्र हेतुमाह ॥ दृश्यत्वाव्यतिरेकाभ्यामिति । अतो यदाद्यंतवत्तदवस्तु
अत्रैवं प्रयोगः विमतं सन्न भवति दृश्यत्वाकारणाव्यतिरेकात् ॥ आद्यंतवत्त्वाच्च रज्जुसर्पादिवदिति ॥ २१ ॥ तत्राव्यतिरेकं दर्शा
तेन प्रपंचयति दीपवदिति । दीपचक्षूरूपाणां तेजोविशेषाणां यथा तेजसो न व्यतिरेकः तथा धीकलोखानिकरणानि मात्राः विषयाः
कृतात् ब्रह्मणः पृथक् न स्युरसत्कार्यत्वात् ॥ नन्वेवं कार्यकारणयोरभेदे कार्यासत्त्वे कारणस्याप्यसत्त्वं प्रसज्येत तत्राह ॥ अनन्यतमा

बुद्धीन्द्रियादिरूपेण ज्ञानं भाति तदाश्रयं ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तु यत ॥ २१ ॥ दीपश्चक्षुश्च रू
पंच ज्योतिषो न पृथग्भवेत ॥ एवं धीःखानि मात्राश्च न स्युरन्यतमाहृतात ॥ २२ ॥ बुद्धेर्जागरणस्वप्नसुषुप्तिरि
तिर्वोच्यते ॥ मायामात्रमिदं राजन्नानात्वं प्रत्यगात्मनि ॥ २३ ॥ यथा जलधरा व्योम्नि भवंति न भवंति च ॥ ब्रह्म
णीदं तथा विश्वमवयव्युदयाप्ययात ॥ २४ ॥

दिति कार्योदयांतव्यतिरिक्ताद्ब्रह्मणः प्रपंचाद्ब्रह्मणोस्ति व्यतिरेकः ॥ प्रपंचस्य तु ततो नास्ति व्यतिरेक इत्यर्थः ॥ २३ ॥ यदा तु बु
द्धेरसत्त्वं तदा तदवस्थानां सुतरामसत्त्वमित्याशयेनाह ॥ बुद्धेरिति ॥ ननु विश्वतैजसप्राज्ञानामेता अवस्था न बुद्धेरित्याशंक्या
ह ॥ मायामात्रमिति ॥ इदं विश्वतैजसप्राज्ञरूप ॥ २४ ॥ आद्यंतवत्त्वादित्यस्य हेतोरसिद्धिमाशंक्य सावयवत्त्वेन साधयति यथे
ति ॥ अवयवीति यत्सावयवं तदाद्यंतवत ॥ घटादिवदित्यर्थः स्वतनुदयाप्ययात ॥ आद्यंतवत्त्वाद्विश्वं सन्न भवतीत्यर्थः ॥

यद्वा घटपटगोवागमायायित्वादि स्वप्नेमिथ्यात्वं तत्तु तदवधित्वात् सत्यमित्यनेन साध्यते ॥ दृष्टांतस्तु पूर्वोक्त एव यथा जलधराद्यो मृगी
तिदृष्टांतस्त्वागमायायित्तदवधित्वमात्रेण तु मिथ्यात्वइति ॥ २४ ॥ अनंतमादृतादिति ॥ प्रतिज्ञातं कारणस्य सत्यत्वमुपपादय
ति ॥ अवयव: कारणं प्रोक्त: वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतिभि: । अत्र युक्तिमपि दर्शयति । वि
नेति ॥ अंगहेराडतत्रयैर्न अवयवैर्विना पृथगेव अवयवा: प्रतीयेरन् यथा पटस्यावयवा: । ततव: पटात् पृथक् प्रतीयं
ते न तद्वदिति ॥ २५ ॥ ननु कार्याभावे कारणत्वं ब्रह्मण: । कुतो घटे तत्सत्त्वं तदपिनातीव सत्यमित्याह ॥ यदिति । सामान्यकारणं वि
शेष: कार्यं तद्रूपेणान्योन्यमाश्रयत्वात् परस्परापेक्षत्वेन निरूपणासहत्वादित्यर्थ: ॥ अत: कारणत्वमवधित्वं व्यापक

सत्यं ह्यवयव: प्रोक्त: सर्वावयवविनामिह ॥ विनार्थैर्न प्रतीयेरन् पटस्येवांशास्तंतव: ॥ २५ ॥ यत्सामान्यविशे
षाभ्यामुपलभ्येत स भ्रम: ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तु यत् ॥ २६ ॥ विकार: ख्यायमानोपि प्र
त्यगात्मानमंतरा ॥ न निरूप्योऽस्त्यणुरपि स्याच्चेच्चित्सम आत्मवत् ॥ २७ ॥

त्वमित्यादिकमपि परस्परापेक्षत्वादाद्यंतवत् तत्सर्वमवस्त्वित्यर्थ: ॥ यद्वा तत्रैव हेत्वंतरमेव तत् ॥ यदुपलभ्येत स भ्रम: । सामान्यवि
शेषरूपत्वात् स्वप्नवत् । अन्योन्यापाश्रयादिति हेत्वंतरं ॥ गुणगुणिविशेषणविशेष्यव्यापकत्वादिरूपेण परस्
पराधीनसिद्धत्वात् तथाभूतस्य स्वप्नवदिति निगमनं अतो यदाद्यंतवत्तत्सर्वमवस्त्विति ॥ २६ ॥ तदेवमनेकैर्हेतुभि: प्रपं
चस्यासत्त्वं प्रसाधितं । २६ । तत्र शंकानु प्रपंचस्यापि प्रकाशमानत्वादात्मवत्सत्त्वं किं न स्यादिति तत्राह ॥ ख्यायमान: प्रकाशमानो
पि विकार: । प्रपंच: प्रत्यगात्मप्रकाशं विना अणुमात्रोपि न निरूप्योऽस्ति तं विना निरूप्य: स्याच्चेत् । तर्हि सोपि चित्सम: स्यात् चिद्रूपेण

त्मनात्मसम: स्वप्रकाशो भवेत् तथा च सति सोप्यात्मव
स्यात् एकरूप: स्यादित्यर्थ: २७

ना॰ प्रा॰
२३

कुत इत्यत आह॥ न हीति न नु मत्यस्यात्मनो जीवब्रह्मरूपनानात्वमस्त्येव तत्राह॥ यद्येवं नानात्वं मन्यते तर्हि विद्वान् कथं तर्हि तयोर्भे
द व्यवहारः॥ उपाधिकृत इत्याह॥ नानात्वमिति तत्र छिद्रयोर्घटाकाश महाकाशयोरिवेति परिच्छेदापरिच्छेदहृष्टांतः ज्योतिषोः॥
आकाशजलस्थसूर्ययोरिवेत्युपाधिकृतविकारसद्भावेवातयोर्वा ह्यशरीरस्थवाय्वोरिवेति क्रियाभेदे॥ २८॥ ब्रह्मण एव प्र
पंच व्यवहारालंबनत्वं दृष्टांतेन स्पष्टयति॥ यथेति क्रियाभिस्तत्तद्वचनाभेदैर्बहुधा कटककुंडलादिरूपेण लौकिकैर्वैदिकै
र्वचोभिः जनैः अहंकारोपहितैः॥ २९॥ न त्वहंकारस्य कथं स्वरूपावरणेन भेदव्यवहारहेतुत्वं तस्य स्वकारणभूतब्रह्माव

न हि रस्यस्य नानात्वमविद्वान्यदि मन्यते॥ नानात्वं छिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव॥ २८॥ यथा हिरण्यं
बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु॥ एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिक
वैदिकैर्जनैः॥ २९॥ यथा घनोऽर्कप्रभवोऽर्कदर्शितो ह्यर्कांशभूतस्य च चक्षुषस्तमः॥ एवं त्वहं ब्रह्म
गुणस्तदीक्षितो ब्रह्मांशकस्यात्मन आत्मबंधनः॥ ३०॥

रकत्वसंभावात्। आवरणे वा स्वस्यापि प्रकाशाभावादित्याशंक्य सदृष्टांतमाह यथेति॥ अर्करश्मय एव मेघरूपेण परिण
तीं वर्षंति॥ अग्नौ प्रास्ताहुतिः॥ सम्यक् आदित्यमुपतिष्ठति॥ आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा॥ इत्यादिवचनात्
तस्मादर्कप्रभवः अर्केणैव दर्शितः प्रकाशितश्च तमः स्वरूपभूताक्षदर्शने प्रतिबंधको भवति॥ अहं अहंकारः ब्रह्म
गुणः ब्रह्मकार्यभूतः। तदीक्षितस्तेनैव प्रकाशितश्च आत्मनो जीवस्य आत्मबंधनः। ब्रह्मस्वरूपदर्शने प्रतिबंधको भव

अत एवाहंकारनाशो स्वरूपदर्शनं भवतीति तेनैव दृष्टांतेनाह ॥ घन इति ॥ आत्मन उपाधिः जिज्ञासया विचारेण तर्हि तदा अनु-
स्मरेत् ब्रह्माहमिति प्रपश्यतीत्यर्थः ॥३२॥ नित्यप्रलयमाह नित्यदेति ॥३३॥ कुत इत्यत आह ॥ कालेति परिणामिनां नदीप्रवाहप्रदीप-
ज्वालादीनां या उच्चनीचावस्थाः ताः कालरूपस्रोतसो वेगेनाशु ह्रियमाणस्य देहादेर्दृश्यमानाः तद्वदेव नित्यदा जन्मप्रलय-
हेतवो भवंति हेतुः प्रतिक्षणप्रध्वंसी प्रतिक्षणमवस्थाने दृश्यविद्यमानत्वात् प्रदीपादिवदनुमानं ॥३४॥ यदि प्रतिक्षणं
अवस्था भवंति तर्हि किं न दृश्यते ॥ अतो हेतुरसिद्ध इत्याशंक्याह ॥ अनाद्यंतवता कालेन जायमाना अवस्था नैव लक्ष्यंते आका-

घनो यदार्कप्रभवो विदीर्यते चक्षुः स्वरूपं रविमीक्षते तदा ॥ यदा ह्यहंकार उपाधिरात्मनो जिज्ञासया
नश्यति तर्ह्यनुस्मरेत् ॥३१॥ यदैवमेतेन विवेकहेतिना मायामयाहंकरणात्मबंधनं ॥ छित्वाच्युतात्मानु-
भवोवतिष्ठते तमाहुरात्यंतिकमंग संप्लवं ॥३२॥ नित्यदा सर्वभूतानां ब्रह्मादीनां परंतप ॥ उत्पत्तिप्रलया-
वेके सूक्ष्मज्ञाः संप्रचक्षते ॥३३॥ कालस्रोतोजवेनाशु ह्रियमाणस्य नित्यदा ॥ परिणामिनामवस्थास्ता ज-
न्मप्रलयहेतवः ॥३४॥ अनाद्यंतवतानेन कालेनेश्वरमूर्त्तिना ॥ अवस्था नैव दृश्यंते वियति ज्योतिषामि-
व ॥३५॥

शे गच्छतां ज्योतिषां चंद्रादीनां गमनावस्थाविशेषाः । यथा नैव लक्ष्यंते तद्वत् ॥ अतो यथा तेषां प्रदेशांतरप्राप्त्या
प्रतिक्षणं गत्यवस्थाः । कल्प्यंते तद्वदत्रापि बाल्यतारुण्यादिदर्शनेन मध्यवर्त्तिन्योवस्थाः कल्प्यंत इत्यनहेतुरसिद्ध इत्यर्थः
॥३५॥

भा०द्वा०
२७

उपसंहरतीति नित्य इति । ३६ ॥ पुराणार्थमुपसंहरति ॥ एता इति ॥ लीलाविषयाः कथाः । अतो ब्रह्मापि कार्त्स्न्येन नाभिधातुं नेशः । ३७
ननु यदि साकल्येनाभिधातुं न शक्यं ते तर्हि किं तदभिधानेन तत्राह ॥ संसारेति विविधं दुःखमेव दवो दावानलस्तेनार्दितस्य
पीडितस्य अतन्तु तितीर्षोः पुंसः भगवतो या लीलास्तासां कथाः ॥ तासां रसस्तन्निषेवणमंतरेणान्यः प्लवस्तरणसाधनं

नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः ॥ आत्यंतिकश्च कथितः कालस्य गतिरीदृशी ॥ ३६ ॥ एताः कु
रुश्रेष्ठ जगद्धातुर्नारायणस्याखिलसत्त्वधाम्नः ॥ लीलाकथास्ते कथिताः समासतः कार्त्स्न्येन नाजोप्य
भिधातुमीशः ॥ ३७ ॥ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यः प्लवो भगवतः पुरुषोत्तमस्य ॥ लीलाकथा
रसनिषेवणमंतरेण पुंसो भवेद्विविधदुःखदवार्दितस्य ॥ ३८ ॥ पुराणसंहितामेतामृषिर्नारायणोव्य
यः ॥ नारदाय पुरा प्राह कृष्णद्वैपायनाय सः ॥ ३९ ॥ स वै मह्यं महाराज भगवान्बादरायणः ॥ इमां भागव
तीं प्रीतः संहितां वेदसंहितां ॥ ४० ॥ एतां वक्ष्यत्यसौ सूत ऋषिभ्यो नैमिषालये ॥ दीर्घसत्रे कुरुश्रेष्ठ संपृष्टः
शौनकादिभिः ॥ ४२ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे चतुर्थोध्यायः ॥ ४ ॥

न भवेत् । उपायांतराभावात्तत्कथाश्रवणमेव यथाशक्ति निषेव्यमित्यर्थः । ३८ ॥ श्रोतुरादरार्थं ग्रंथस्य संप्रदायप्रवृ
त्तिमाह । पुराणसंहितामिति त्रिभिः । ३९ । स वै बादरायणः । प्रीतः सन्मह्यमिमां संहितां प्राहेति पूर्वेणान्वयः । ४० । अत्रसमे
स्तत इति पुरतः ॥ स्थितमंगुल्या निर्दिशन्नाह ॥ नैमिषालये नैमिषारण्यस्थाने ॥ ४२ ॥ द्वादशे चतुर्थः ॥ ४ ॥ २७

पंचमे तु समासेन परब्रह्मोपदेशात् राज्ञस्तक्षकसंदंशान्मृत्युभीतिनिवारणं ॥ एतत्पुराणं स एव न भयं प्राप्नोतीत्यभिप्रेत्य
पुराणार्थमनुस्मारयति ॥ अत्रेति ॥ अयं भावः जगतः कर्त्ता ब्रह्मापि यस्य प्रसादजः प्रमादोऽग्रजोऽहमिति हि यैः ततोऽजातत्वात्परतं
त्रः सर्वसंहर्त्ता रुद्रश्च यस्य क्रोधसंभवो न तु स्वतंत्रः स विश्वस्यात्मा नित्यं तां भगवानत्रानुवर्ण्यते ॥ अत एवंभूतं भागवतं स एव
तः ॥ कुतोऽस्मादन्यद्यष्टीकेति ॥ १ ॥ त्वं पुनः कृतार्थ एवेत्यनुस्मारयति त्वं त्विति ॥ पशुबुद्धिं अविवेकं यस्मान्नूनं नंक्ष्यसि ॥ कुत इत्य
त आह ॥ न जात इति यथा देहः प्रागभूत एवाद्य जातो नंक्ष्यति च । न चैवं त्वं पूर्वं नाभूः ॥ न वाद्य जातोऽसि अतो न नंक्ष्यसि ॥ २ ॥ न

श्रीशुक उवाच ॥ अत्रानुवर्ण्यतेऽभीक्ष्णं विश्वात्मा भगवान्हरिः ॥ यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः
॥ १ ॥ त्वं तु राजन्मरिष्येति पशुबुद्धिमिमां जहि ॥ न जातः प्रागभूतोऽद्य देहवत्त्वं न नंक्ष्यसि ॥ २ ॥ न भविष्य
सि भूत्वा त्वं पुत्रपौत्रादिरूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तो यथानलः ॥ ३ ॥

नु बीजादंकुरवत्स्वस्मात्पुत्ररूपेण स्वयमेव भवति ॥ यथाह श्रुतिः अंगादंगात्संभवति हृदयादभिजायसे ॥ आत्मा वै पुत्रनामा
सि संजीव शरदः शतमिति ॥ ततः पुनरंकुराद्बीजमिव पौत्ररूपेणापि स्वयमेव भवति पिता पुत्रेण पितृमान्योनियोनाविति
श्रुतेः ॥ अतस्तेषु नष्टेष्वपि तु कथं न नंक्ष्यामीति चेत्तत्राह ॥ न त्वं भविष्यसीति ॥ भूत्वा पुत्रपौत्रादिरूपवान्बीजांकुरवन्न भविष्य
सि ॥ यस्माद्देहादेर्व्यतिरिक्तस्त्वं यथानलः । काष्ठात् देहाद्देहो जायते नात्मेति भावः ॥ ३ ॥

जन्मादीनां देहधर्मत्वं दर्शितेन प्रपंचयति ॥ स्वप्नेयथात्मनः शिरश्छेदं स्वयं पश्यति ॥ एवं जागरणेपि यस्माद्देहस्य पंचत्वादिकं पा-
श्यति ततस्तद्वदेवात्मनस्तं न ममात्रेवस्तुतु आत्मा तु मारश्चेत्पथेः ॥ तदुक्तं आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ न भवा-
प्ययुवस्तूनामभिज्ञो द्वयलक्षणा इत्यादि ॥ ४ ॥ यस्माद्देहोपाधिकोयमात्मनो जन्मादिसंसारक्रमः ॥ तस्मात्तदुपाधिनिवृत्तौ मुच्य-
त इति सदृष्टांतमाह ॥ घटेति ॥ यथा पुरा घटोपाधेः ॥ एवमेव पुनर्घटे भिन्ने तदंतर्वर्त्त्यवकाशः ॥ आकाश एव स्याद्यथा एवं
देहमृते तत्वज्ञानेन तल्लीनस्सति ॥ ५ ॥ ज्ञानेन तल्लयं संभावयितुं मायाकृतमात्मनो देहाद्युपाधिसंबंधप्रकारमाह ॥ मन इत्यात्मनो देहा-

स्वप्ने यथा शिरश्छेदं पंचत्वाद्यात्मनः स्वयं ॥ यस्मात्पश्यति देहस्य तत आत्मा ह्यजो मरः ॥ ४ ॥ घटे भिन्ने यथा-
काश आकाशः स्याद्यथा पुरा ॥ एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥ ५ ॥ मनः सृजति वै देहान् गुणान् कर्म्मा-
णि चात्मनः ॥ तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥ ६ ॥ स्नेहाधिष्ठानवर्त्त्यग्निसंयोगो यावदीयते
ततो दीपस्य दीपत्वमेवं देहकृतो भवः ॥ ७ ॥ रजःसत्वतमोवृत्त्या जायतेथ विनश्यति ॥ न तत्रात्मा स्वयंज्योतिर्यो
व्यक्ता व्यक्तयोपरः ॥ ८ ॥

दीन् सृजति ॥ तच्च मनो माया सृजति ॥ ततो मायाद्युपाधिसमुदा याद् ॥ ६ ॥ एतदेव सदृष्टांतमाह स्ना
देनस्नेहेति दीपस्य ज्योतिषः दीपत्वं ज्वालारूपः परिणामः ॥ तत्र तैलस्थानीयं कर्म ॥ तदधिष्ठानस्थानीयं मनः ॥ वर्ति
स्थानीयो देहः अग्निसंयोगस्थानीयश्चेतन्याध्यासः ॥ दीपस्थानीयः ॥ संसार इति योज्य ॥ देहकृतः देहनिबंधनः यद्वा
देहकृतो मनसः ॥ न चात्मनः ॥ ७ ॥ अतो दीपवत्संसार एव नश्यति ॥ न त्वात्मा ज्योतिर्वदित्याह ॥ नेति ॥ न तु तत्र प्रतीयमानः ॥
आत्मा कुत इत्यत आह ॥ य इति ॥ व्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोः परः अन्य अतः स्वयंज्योतिः ॥ ८ ॥

परन्त्वं प्रपंचयति॥ आकाश इवेति। आधारो देहादेः प्रपंचस्य ध्रुवो निर्विकारः नास्त्यंतरुपमा यस्य सोनंतोपमः॥ ततो विमुः
क्तत्स्वमेवं चिंतयेत्याह॥ एवमिति। आत्मस्थं देहाद्युपाधिस्थितं आमृश विचारय॥ अनुमानगर्भिण्या उद्गृह्य उपान्वयव्य
तिरेकायुतया॥९॥ एवं च सति त्वां तक्षको न दक्ष्यतीत्याह॥ चोदित इति त्रिभिः॥१०॥ विमर्शप्रकारं दर्शयन् तक्षकादर्शनं द
र्शयति द्वाभ्यां। योहं स ब्रह्मैव यद्ब्रह्म तदहमेवेति॥ समाहृतनतन्नाहं ब्रह्मेति भावनया जीवस्य शोकादिनिवृत्तिः। ब्रह्माहमिति भावन

आकाश इव चाधारो ध्रुवोनंतोपमस्ततः॥ एवमात्मानमात्मस्थमात्मनैवामृश प्रभो॥ बुद्ध्यानुमानगर्भिण्या वासु
देवानुचिंतया॥९॥ चोदितो विप्रवाक्येन न त्वां धक्ष्यति तक्षकः॥ मृत्यवो नोपधक्ष्यंति मृत्यूनां मृत्युमीश्वरं॥ अ
हं ब्रह्म परं धाम ब्रह्माहं परमं पदं॥ एवं समीक्ष्य चात्मानमात्मन्याधाय निष्कले॥११॥ दशंतं तक्षकं पादे ले
लिहानं विषाननैः॥ न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः॥१२॥ एतत्ते कथितं तात यदात्मा पृष्टवान्नृप॥ ह
रेर्विश्वात्मनश्चेष्टां किं भूयः श्रोतुमिच्छसि॥१३॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे प्रमाणलक्षणे
पंचमोध्यायः॥५॥

या च ब्रह्मणः परोक्षनिवृत्तिर्भवतीति व्यतिहारो दर्शितः निष्कले निरुपाधौ आत्मनि ब्रह्मणि॥११॥ विषयुक्तैराननैर्दशंतं
ग्रसंतं तक्षकं लेलिहानं जिह्वाभिरास्वादयंतं तेष्वेव मास्वादयंतं॥ आत्मनः पृथक्॥१२॥ हरेश्चेष्टां आत्मतत्त्वं यत्पृष्टवानसि त
त्ते कथितं॥ शिष्यस्य कृतार्थतापरीक्षणाय पृच्छति किमिति॥१३॥ द्वादशे पंचमः॥५॥

भा० द्वा० २६

षष्ठे परीक्षितो मोक्षः सर्प्पहोमादितन्मूलात ॥ वेदशाखा विभागो ऽ न्तेऽत्रि वेदव्याससंवर्णनं ॥ एतत्पुराणं निशम्य निखिलात्मा हरिस्तं
पश्यति निखिलं चात्मनि पश्यतीति तथा तेन ॥ अतः समेन नतेन अवनतेन मूर्ध्ना तत्पादतलमुपसृत्य तस्य पादौ शिरसि निधा
येत्यर्थः ॥ १ ॥ सिद्धः कृतार्थोस्मि यतः अनुगृहीतोस्मि अनुग्रहमेवाह ॥ यत् यस्मात् श्रावितः ॥ चशब्दात् ग्राहितश्चेति ॥ २ ॥ क
रुणात्मतामभिनंदति द्वाभ्यां नात्यद्भुतमिति ॥ ३ ॥ अश्रौष्म अशृणवाम भवतः सकाशात् ॥ ४ ॥ सिद्धोस्मीत्युक्तं तदेवाविः करोति

सूत उवाच ॥ एतन्निशम्य मुनिनाभिहितं परीक्षिद्व्यासात्मजेन निखिलात्मदृशा समेन ॥ तत्पादपद्ममुप
सृत्य नतेन मूर्ध्ना बद्धांजलिस्तमिदमाह स विष्णुरातः ॥ १ ॥ राजोवाच ॥ सिद्धोस्म्यनुगृहीतोस्मि भवता करुणा
त्मना ॥ श्रावितो यच्च मे साक्षादनादिनिधनो हरिः ॥ २ ॥ नात्यद्भुतमहं मन्ये महतामच्युतात्मनां ॥ अज्ञेषु ता
पतप्तेषु भूतेषु यदनुग्रहः ॥ ३ ॥ पुराणसंहितामेतामश्रौष्म भवतो वयं ॥ यस्यां खलूत्तमश्लोको भगवाननु
वर्ण्यते ॥ ४ ॥ भगवंस्तक्षकादिभ्यो मृत्युभ्यो न बिभेम्यहं ॥ प्रविष्टो ब्रह्म निर्वाणमभयं दर्शितं त्वया ॥ ५ ॥ अनुजानी
हि मां ब्रह्मन् वाचं यच्छाम्यधोक्षजे ॥ मुक्तकामाशयं चेतः प्रवेश्य विसृजाम्यसून् ॥ ६ ॥ अज्ञानं च निरस्तं मे ज्ञा
नविज्ञाननिष्ठया ॥ भवता दर्शितं क्षेमं परं भगवतः पदं ॥ ७ ॥

भगवन्निति यतः त्वया ट
प्रविष्टोहं निर्भीः तं ब्रह्म प्रविष्टः
कथंभूतं अभयं यतो निर्वाणं कैवल्यरूपं ॥ ५ ॥ किं भूयः श्रोतुमिच्छसीति यदुक्तं तत्रा सिद्धोहं न किंचिच्छ्रोतुमिच्छामि केव
लमनुज्ञां देहीत्याह ॥ अनुजानीहीति ॥ वाचमित्युपलक्षणं सर्वेंद्रियाणां वाचं नियम्य किं करिष्यसि तदाह मुक्ताः । कामा स्त
द्वासना यस्मिन् तच्चेतः अधोक्षजे प्रवेश्य असून् विसृजामि ॥ ६ ॥ ननु किं श्व ... णत्यागेन किंचित्कालं ज्ञाननिष्ठो भवेति चेत्तत्राह ॥ अ

[illegible] ॥ ७ ॥

२६

८॥ आत्मना बुद्ध्या आत्मानं मनः॥ आत्मनि प्रत्यक्प्रकाशे समाधाय परमात्मानं दध्यौ ॥ अस्पंदासुः लीनप्राणः यथा तरुः स्था
णुः ॥ ९ ॥ तमेव विशिनष्टि प्राक्कूले प्रागग्रेषु बर्हिषि दर्भे ॥ १० ॥ तदेवं ब्रह्मभूतस्य तस्मिंस्तक्षकागमनादिकं पिष्टपेषणमि
वाभवदिति दर्शयति ॥ तक्षक इति त्रिभिः ॥ हे विप्राः तं विषचिकित्सया परीक्षिद्रक्षणेन द्रव्यार्जनाय आगच्छंतं ॥ ११ ॥ तत्र स्थालीदव
दग्धस्य भस्मीभूतस्य पुनरंकुरादिक्रमेणोत्थापनादिविषहारिणं तदपेक्षितद्रविणैः ॥ संतर्प्य ततो निवर्त्य द्विजरूपेण

सूत उवाच ॥ इत्युक्तस्तमनुज्ञाप्य भगवान्बादरायणिः ॥ जगाम भिक्षुभिः साकं नरदेवेन पूजितः ॥ ८ ॥ परीक्षि
दपि राजर्षिरात्मन्यात्मानमात्मना ॥ समाधाय परं दध्यावस्पंदासुर्यथा तरुः ॥ ९ ॥ प्राक्कूले बर्हिष्यासीनो गंगाकू
ल उदङ्मुखः ॥ ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः ॥ १० ॥ तक्षकः प्रहितो विप्राः क्रुद्धेन द्विजसूनुना ॥
हंतुकामो नृपं गच्छन्ददर्श पथि कश्यपं ॥ ११ ॥ तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणं ॥ द्विजरूपप्रतिच्छन्नः
कामरूपोऽदशन्नृपं ॥ १२ ॥ ब्रह्मभूतस्य राजर्षेर्देहोऽहिगरलाग्निना ॥ बभूव भस्मसात्सद्यः पश्यतां सर्वदेहिनां
॥ १३ ॥ हाहाकारो महानासीद्भुवि खे दिक्षु सर्वतः ॥ विस्मिता ह्यभवन्सर्वे देवासुरनरादयः ॥ १४ ॥ देवदुंदुभयो
नेदुर्गंधर्वाप्सरसो जगुः ॥ ववृषुः पुष्पवर्षाणि विबुधाः साधुवादिनः ॥ १५ ॥ जन्मेजयः स्वपितरं श्रुत्वा तक्ष
कभक्षितं ॥ यथाजुहाव संक्रुद्धो नागान्सत्रे सह द्विजैः ॥ १६ ॥ सर्पसत्रे समिद्धाग्नौ दह्यमानान्महोरगान् ॥ दृष्ट्वेंद्रं
भयसंविग्नस्तक्षकः शरणं ययौ ॥ १७ ॥

तिरोहितः सन्नदशत ॥ १२ ॥ तच्च पुत्रकृत्यमिव जात मित्याह ॥ ब्रह्मभूतस्येति ॥ १३ ॥ तत्र दृष्टा
नां सर्वेषां दुःखं ततः परमुत्सवं चाह द्वाभ्यां हाहाकार इति ॥ १५ ॥ प्रासंगिकमाह ॥ जनमेजय इत्यादि ॥ सर्पाभिचारसत्रे द्विजैः सा
ह वर्तमानः यथावदाजुहाव जुहाव वेति वा सर्वसर्पावाहने कारणमाह संक्रुद्ध इति ॥ १६ ॥

२८॥ कस्मात्तक्षकोनरह्येते सुक्ताः संतोद्विजाः ऊचुः तमिति तेन इंद्रेण अभीसर्पेः ॥२९॥ आविष्णः प्रतिप्राह सहेंद्रः इंद्रसहितः कि
मिति न पात्यति ॥२०॥ तदा ब्राह्मणावचः श्रुत्वा आजुहुवुः सोपेंद्रः मा क्रानंदश्रीयति ॥ तक्षकेति ॥ इहागच्छ वा सुपतस्त्वमरुत्वता महा
कुणावता इंद्रेण सह ॥२१॥ ब्राह्मणेरुक्ते राज्ञेपेः परुषवाक्यैः सतक्षकः ॥२२॥ अंगिरसः पुत्रो बृहस्पति प्राह ॥२३॥२४॥ भवतु ना

अपश्यंतक्षकंतत्रराजा पारीक्षितो द्विजान् ॥ उवाच तक्षकः कस्मान्नरह्येतोरगाधमः ॥२८॥ तं गोपाय
तिराडिंद्रस्तक्षकः शरणमागतं ॥ तेनसस्तंभितः सर्पस्तस्मान्नाम्नोपतत्यसौ ॥२९॥ पारीक्षित इति श्रुत्वा ब्रा
ह्मविडुत्तरारघ्रौः ॥ सहेंद्रस्तक्षको विप्रा नाग्नौ किमिति पात्यते ॥२०॥ तं श्रुत्वा जुहुवु विप्राः सहेंद्रं त
क्षकं मखे ॥ तक्षकाः श्रूयतस्त्वेह सहेंद्रेण मरुत्वता ॥२१॥ इति ब्रह्मोदिताहृते पैः स्थानादिंद्रः प्रचालितः ब
भूव संभ्रांतमतिः सविमानः सतक्षकः ॥२२॥ तं पतंतं विमानेन सह तक्षकमंबरात् ॥ विलोक्यांगिरसः प्राह ॥
राजानं तं बृहस्पतिः ॥ नैषत्वया मनुष्येंद्र वधमर्हति सर्पराट् अनेनपीतममृतं अथवा अजरामरः ॥२४॥ जीवि
तं मरणं जंतोर्गतिः स्वेनैव कर्मणा ॥ राजस्ततोन्योनान्यस्य प्रदातासुखदुःखयोः ॥२५॥ सर्पचौराग्निविद्युद्भ्यः क्षुत्त
ड्व्याध्यादिभिर्नृप ॥ पंचत्वमृच्छते जंतुर्भुंक्ते प्रारब्धकर्मतत् ॥२६॥ तस्मात्सत्रमिदं राजन्संस्थीयेताभिचारकं २७

मातुरामारः ॥ तयापिपिलमारकं धक्ष्यामीति चेत्तत्राह ॥ जीवितमिति ॥ गतिः परलोकः ॥ अतो दुष्कर्मरणनिमित्तापितु गतिरने
न कृतेत्यपि न शोकनीयमित्यर्थः ॥२५॥ कश्चमन्यः सुखप्रदाता नास्ति ॥ सर्पादीनामुपलभ्यमानत्वादिति चेत्तत्राह ॥ सर्पादी
नां जंतुः पंचत्वमृत्युमृच्छेति ॥ प्राप्नोतीति यत्तत्प्रारब्धकमेवभुंक्ते स्वकर्मप्रयुक्ता एव सर्पादयो न स्वतंत्रा इति भावः ॥२६॥ सं

सोपिनिजसमयमाप्तांतकालंगारकंहिंसाफलं ॥

दिष्टं प्राचीनं कर्म ॥ अतः सर्पादिष्वप्युत्पत्तवाप्ययं न पराध इति भावः ॥ २७ ॥ वाक्यतिं दहस्यतिं ॥ २८ ॥ ननु कथं विदुषामप्ये
वं संमोहः ॥ यतो ब्रह्मकोपात्यरीक्षितो मृत्युः जनमेजयकोपात्सर्पाणामित्यादि तत्राह ॥ सैवेति ॥ तस्या महत्त्वं दर्शयति ॥ अ
लक्षणा न लक्ष्यत इत्यलक्षणा अश्रुतकेत्यर्थः कामादिरूपस्तत्राह ॥ यपास्य विष्णोरेव आत्मभूताः आत्मांशभूताः प्राणि
नः गुणवृत्तिभिः क्रोधादिभिः भूतेषु देहेषु मुह्यंति वाध्यवाधकतां व्रजंतीत्यर्थः ॥ ननु श्रवणादिनावाधितया कुतो मोहः स्या

सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते ॥ २७ ॥ इत्युक्तः स तथेत्याह महर्षेर्मानयन्वचः ॥ सर्पसत्रादु
परतः पूजयामास वाक्पतिं ॥ २८ ॥ सैषा विष्णोर्महामायावाध्ययालक्षणा यया ॥ मुह्यंत्यस्यैवात्मभू
ता भूतेषु गुणवृत्तिभिः ॥ २९ ॥ न यत्र दंभीत्यभया विराजिता मायात्मवादेऽसकृदात्मवादिभिः ॥ न
न यद्विवादो विविधस्तदाश्रयो मनश्च संकल्पविकल्पवृत्ति यत् ॥ ३० ॥

तत्राह ॥ अवाध्ययावाधितुमशक्यया ॥ २९ ॥ कथं तर्हि मायातत्कार्यनिवृत्तिरित्याशंक्य श्रीविष्णुस्वरूपनिरूपणापू
र्वकं तद्विज्ञानात् सर्वानर्थनिवृत्तिरिति ॥ शास्त्रार्थमुपसंहरति ॥ न यत्रेति पंचभिः ॥ दंभीति या माया कपटं वा तद्रूपमा
तिस्यैवंभूतायां बुद्धावसकृदुल्लिख्यमानायां मायेत्यर्थः ॥ सोऽयमात्मवादे क्रियमाणे आत्मवादिभिर्यत्राभया न विराजिता न
प्रकाशिता किं तु भीतेव स्वकार्यं मोहादिकमकुर्वती कथंचित वर्तते तदिति प्रतिपादितेत्यर्थः ॥ तदुक्तं तस्मै नमो भगवते वासु

ना० द्वा० २८

देवाय धीमहि॥ यन्मायया दुर्जयया मां ब्रुवंति जगद्गुरुं॥ विलज्जमानया यस्य स्थातुमीक्षापथेमुया॥ विमोहिता विकत्थं
ते ममाहमिति दुर्धियः इति। किंच॥ यत्रास्मिन्न तत्र माययोर्मायाश्रययोर्विविधो वादोपि नास्ति॥ विशेषविषयत्वाद्विवादानां
॥ तस्य च विशेषातीतत्वादिति भावः। संकल्पविकल्पात्मकं मनो यस्य तन्मनोपि यत्र नास्ति॥ संकल्पविकल्पानामपि विशेष
विषयत्वात्॥ ३०॥ किंच॥ इदं कर्मेदं कर्ता कारकवर्गेण सह॥ उभयोः इहामुत्रयोः परं साध्यं श्रेयः फलमपि॥ अतः

न यत्र चेदं स्वदिदं सदुद्धतो नयोः परं श्रेयश्च ती वत्रिभिरन्वितस्त्वहम्॥ तदेतदु
त्पादितबाध्यबाधकं निषिध्य चोर्मीन्विरमेत स्वयं मुनिः॥ ३२॥

त्रिभिः स्तुत्यस्तुत्फलैरन्वितोऽत्रीवृश्चश्च अहंकारात्मको यत्र नास्ति॥ अत उत्पादितौ निरस्तौ बाध्यबाधकौ यस्मिन्
तदेतत्स्वयं आत्मस्वरूपमित्यर्थः॥ तत्तस्मिन्नूर्मीन् अहंकारादीन् निषिध्य विरमेत् क्लिशो मेणक्रीडेदित्यर्थः। ३२। २८

यतस्तद्ब्रह्मवं पदमामनंतीत्याह॥ यदेतत्तदेव परं वै ब्रह्मवं पदं स्वरूपमामनंति॥ के॥ अतत आत्मव्यतिरिक्तं नुत्सिसृक्षवः त्यक्तुमिच्छवः यतः अनन्यसौहृदाः नास्ति अन्यस्मिन् सौहृदं येषां ते॥ कुतः दौरात्म्यं देहाद्यहंमावं विसृज्य देहे अहंकाराभावात् अन्यत्र सौहृदं नास्ति॥ अतस्त्यक्तुमिच्छव इत्यर्थः॥ कथं नेति नेतीत्येवं॥ अत्रविद्वदनुभवमपि प्रमाणयति॥ हृदोप गुह्य ध्याना

परं पदं वै ब्रह्मवमामनंति तत्र यन्नेति नेतीत्यतदुत्सिसृक्षवः॥ विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यावसितं समाहितैः॥ ३२॥ त एतदधिगच्छंति विष्णोर्यत्परमं पदं॥ अहं ममेति दौर्जन्यं न येषां देहगेहजं॥ ३३॥ अतिवादांस्तितिक्षेत नावमन्येत कंचन॥ न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित्॥ ३४॥ नमो भगवते तस्मै कृष्णायाकुंठमेधसे॥ यत्पादांबुरुहध्यानात्संहितामध्यगामिमां॥ ३५॥

हृदिना॥ ततः समाहितैः रवसितं निश्चितं यथा स्यात् अवसितं अवबद्धं आत्मतया गृहीतमित्यर्थः॥ ३२॥ एवं प्राप्तावधिकारिणो दर्शयति॥ एतदिति॥ देहजमहमिति गेहजं ममेति॥ ३३॥ आप्तं पापमाह॥ अतिवादानिति॥ ३४॥ शास्त्रसमाप्तौ गुरुं प्रणमति॥ नम इति॥ कृष्णाय व्यासाय॥ अध्यगां॥ अधिगतवानस्मि॥ ३५॥

भा०द्वा०
२९

इमां संहितामध्यगामित्युक्तं ॥ तत्र पुराणसंहिताविभागं विशेषतो बुभुत्सुर्वेदविभागमपि प्रसंगात्पृच्छति पैलादिभि
रिति ॥ हे सौम्य ॥ ३६ ॥ तत्र प्रथमं वेदाविर्भावप्रकारमाह ॥ समाहितात्मन इत्यष्टभिः । ब्रह्मणो हृदि यस्मादाकाशात्तस्मान्नादो
ऽभूत् यः । कर्णपुटपिधाने श्रोत्रवृत्तिनिरोधात्स्वदेहेऽपि विभाव्यते वितर्क्यते ॥ ३७ ॥ प्रसंगान्नादोपासकानां मो
क्षफलमाह ॥ यस्य नादस्योपासनया आत्मनो मलं धूत्वा अपोह्य कथंभूतं मलं तमाह ॥ द्रव्यमधिभूतं क्रियाध्यात्मं कारक

शौनक उवाच ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्महात्मभिः । वेदाश्च कथिता व्यस्ता एतत्सौम्याभि
धेहि नः ॥ ३६ ॥ सूत उवाच ॥ समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः । हृद्याकाशादभून्नादो वृत्ति
रोधाद्विभाव्यते ॥ ३७ ॥ यदुपासनया ब्रह्मन् योगिनो मलमात्मनः । द्रव्यक्रियाकारकाख्यं धूत्वा यान्त्य
पुनर्भवं ॥ ३८ ॥ ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् ॥ यत्तल्लिंगं भगवतो ब्रह्मणः परमात्मनः ॥ ३९ ॥

मधिदैवं एवं त्रिधाभूतमाख्या यस्येति तथा तं ॥ ३८ ॥ त्रिवृत् त्रिमात्रः कंठोष्ठादिभिः ॥ उच्चार्यमाणस्योंकारस्याक्षरसमा
म्नायान्तर्भावात्सूक्ष्मतया तं विशिनष्टि ॥ अव्यक्तः प्रभवो यस्य सः तदेवाह स्वराट् स्वत एव हृदि प्रकाशमानः । तमेव का
र्येण लक्षयति यत्तदिति नपुंसकत्वं लिंगशब्दविशेषणत्वात् ॥ लिंगं गमकं ॥ ३९ ॥ २९

कोसौपरमात्मातमाह॥श्रणोतीति॥इमंस्फोटंअव्यक्तमोंकारं॥ननुजीवएवतंश्रणोतुनेत्याह।सुप्तश्रोत्रेकर्णपिधानादिना
अवृत्तिकेपिश्रोत्रेसतिजीवस्तुकरणाधीनज्ञानत्वात्॥नतदाश्रोता।तदुपलब्धिस्तुतस्यपरमात्मकर्तृकैवेतिभावः॥ईश्व
रस्तुनैवंयतःशून्यदृक्शून्येपीन्द्रियवर्गेदृक्ज्ञानंयस्य॥तथाहिसुप्तोयदाशब्दंश्रुत्वाप्रबुध्यतेनतदाजीवःश्रो
तालीनेन्द्रियत्वात्॥अतोयस्तदाशब्दंश्रुत्वाजीवंप्रबोधयतिसयथापरमात्मैवतद्वत्कोसावोंकारः॥तंविशिनष्टि

श्रणोतियइमंस्फोटंसुप्तश्रोत्रेचशून्यदृक्॥येनवाक्व्यज्यतेयस्यव्यक्तिराकाशआत्मनः॥४०॥
स्वधाम्नोब्रह्मणःसाक्षात्वाचकःपरमात्मनः॥ससर्वमंत्रोपनिषद्वेदबीजंसनातनं॥४२॥

सोऽर्द्धनयेनवाक्वृहतीव्यज्यतेयस्यचहृदयाकाशेआत्मनःसकाशाद्व्यक्तिःअभिव्यक्तिः।४०॥किंच॥स्वधाम्नःस्वस्या
श्रयः॥कारणंयत्ब्रह्मतस्यकिंचपरमात्मांशभूतसमस्तदेवतावाचकोपीत्याशयेनाह॥सइतिसर्वमंत्राणामुपनिष
द्रहस्यंसस्वस्वरूपमित्यर्थः।तत्रहेतुःवेदानांबीजंकारणंबीजत्वेप्यविकारितामाह॥सनातनंसदैकरूपंतस्यब्रह्मरूपत्वात्
४॥इदानींततःसर्ववर्णप्रपंचोत्पत्तिप्रकारमाह।तस्येतित्रयस्त्रिसंख्यायुक्ताःभावाःयेरकारोकारमकारैर्धार्यंतेतत्कारण
त्वात्॥तानेवाह गुणासत्वादयःनामानिऋग्यजुःसामानिअर्थाःभूर्भुवःस्वर्लोकाःवृत्तयोजाग्रदाद्याः।४२॥

भा० द्वा० ततस्तेभ्योवर्णेभ्यः॥ अक्षराणांसमाम्नायंसमाहारं तमेवाह॥ अंतस्थाःयरलवाःऊष्माणःशषसहाः॥ स्वराअकाराद्याःस्प
२० र्शाःकादयःह्रस्वदीर्घश्चआदिशब्दात्प्लुतजिह्वामूलीयादयः॥ तदेवलक्षणंस्वरूपंयस्यतं॥४३॥ विभुःचतुर्मुखरूपोभगवा
नस्यदृष्टैरितिएवंसेवानुषंगः॥ चातुर्होत्रविवक्षयाचत्वारोहोत्रोपलक्षिताऋत्विजश्चतुर्होतारःतैरनुष्ठेयंहोत्राध्वर्य्य

तस्यह्यासंस्त्रयोवर्णाअकाराद्याभृगूद्वह॥ धार्यंतेयैस्त्रयोभावागुणनामार्थवृत्तयः॥४२॥ ततो
क्षरसमाम्नायमसृजद्भगवानजः॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणं॥४३॥ तेनासौचतुरोवे
दांश्चतुर्भिर्वदनैर्विभुः॥ सव्याहृतिकान्सोंकारान्चातुर्होत्रविवक्षया॥४४॥ पुत्रानध्यापयत्तांस्तुब्रह्म
र्षीन्ब्रह्मकोविदान्॥ तेतुधर्मोपदेष्टारःस्वपुत्रेभ्यःसमादिशन्॥४५॥ तेपरंपरयाप्राप्तास्तत्तच्छिष्यैर्धृतव्र
तैः॥ चतुर्युगेष्वथव्यस्ताद्वापरादौमहर्षिभिः॥४६॥ क्षीणायुषःक्षीणसत्वान्दुर्मेधान्वीक्ष्यकाल
तः॥ वेदान्ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतनोदिताः॥४७॥

वाद्विकंकर्मचातुर्होत्रंतद्विवक्षया॥४४॥ पुत्रान्मरीच्यादीन्तान्वेदान्ब्रह्मकोविदान्वेदोच्चारणादिनिपुणान्॥४५॥
एवंचतुर्युगेषुप्राप्ताः द्वापरादौद्वापरमादिर्यस्यतदंत्यांशलक्षणस्यकालस्यतस्मिन्द्वापरांतेवेदविभागप्रसिद्धेः॥ शांतनुसमा
कालव्यासावतारप्रसिद्धेश्चव्यस्ताविभक्ताः॥४६॥ तत्रहेतुःक्षीणायुषोजनान्तर्हिपुरुषबुद्धिप्रभवत्वात्अनादरणीयस्या २०
दित्याहहृदिस्थेति॥४७॥

एवंसामान्यतोवेदविभागक्रममुक्त्वावैवस्वतमन्वंतरेविशेषतोनिरूपयितुमाह।।अस्मिन्नपीति।४८।।अंशोमायातस्यांशाः।
सत्वंतस्यकलयाअंशेनअवतीर्णःसन्।४९।।चातुर्विध्यमेवाह।।ऋगादिमंत्राणांराशीन्वर्गशः।।तत्तत्प्रकरणभेदेनउद्धृत्यपृ
थगेकविधमणिराशौमणिगणाः।।यथाराशौविविच्योद्ध्रियंतेतद्वदुद्धृत्यतेमंत्रैश्चतस्रःऋगादिसंहिताश्चक्रे।५०

अस्मिन्नप्यंतरेब्रह्मन्भगवाँल्लोकभावनः।।ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये।।४८।।पराशरात्स
त्यवत्यामंशांशकलयाविभुः।।अवतीर्णोमहाभागवेदंचक्रेचतुर्विधं।४९।।ऋगथर्वयजुःसा
म्नांराशीनुद्धृत्यवर्गशः।।चतस्रःसंहिताश्चक्रेमंत्रैर्मणिगणाइव।।५०।।तासांसचतुरःशिष्यानुपा
हूयमहामतिः।।एकैकांसंहितांब्रह्मन्नेकैकस्मैददौविभुः।।५१।।पैलायसंहितामाद्यांबह्वृचा
ख्यामुवाचह।।वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणं।।५२।।साम्नांजैमिनयेप्राहतथाछंदोगसंहितां
अथर्वांगिरसींनामस्वशिष्यायसुमंतवे।।५३।।पैलःस्वसंहितामूचइंद्रप्रमितयेमुनिः।।बाष्कला
यचसोप्याहशिष्येभ्यःसंहितांस्वकां।५४।।

तासांसंहितामध्येएकैकां।५१।ऋक्समुदायरूपत्वात्बह्वृचाख्यांनितरांप्रश्लेषेणपठ्यमानत्वान्निगदाख्यं।५२।साम्नांसंबं
धिनींछंदस्सुगीयमानत्वात्छंदोगाख्यसंहितां।५३।।तत्रऋग्वेदशाखाविभागमाह।।पैलइतिस्वसंहितांद्विधाविभज्यइं
द्रप्रमितयेबाष्कलायचक्रे।५४।।

ना० ह्या० ३१ सवाष्कलोपिस्वसंहिताश्चतुर्द्धाव्यस्यवोध्यादिभ्यः शिष्येभ्यः। आहहेभार्गव।५२। इंद्रप्रमितिरपिस्वांसंहितांस्वसुतंमांडूके
यमध्यापयामास तस्यमांडूकेयस्यशिष्योदेवमित्रः॥५३। तत्सुतः मांडूकेयसुतः शाकल्योवात्स्यादिषु चपंच स्वधीत
तानध्यापयामासेत्यर्थः॥५४॥ तच्छिष्यः शाकल्यशिष्यः स्वसंहितांत्रेधाविभज्यचतुर्थं वैदिकपदार्थव्याख्यानरूपं निरुक्तं

चतुर्द्धाव्यस्यवोध्याययाज्ञवल्क्यायभार्गव॥पाराशरायाग्निमित्रे इंद्रप्रमितिरात्मवान्॥५२॥ आध्या
पयत्संहितांस्वांमांडूकेयमृषिंकविं॥तस्यशिष्योदेवमित्रः सौभर्यादिभ्यऊचिवान्॥५३॥ साकल्य
स्तत्सुतःस्वांतुपंचधाव्यस्यसंहितां॥वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात्॥५४॥ जातू
कर्ण्यश्चतच्छिष्यः सनिरुक्तांस्वसंहितां॥बलाकपैजवैतालविरजेभ्योददौमुनिः॥५५॥ बाष्कलिःप्र
तिशाखाभ्योवालखिल्याख्यसंहितां॥चक्रेवालायनिर्भज्यकाशारश्चैवतांदधुः॥५६॥ बह्वृचाःसं
हिताह्येताएभिर्ब्रह्मर्षिभिर्धृताः॥श्रुत्वैतच्छंदसांव्यासंसर्वपापैःप्रमुच्यते॥५७॥

चकृत्वावालकादिभ्यश्चतुर्भ्योददौ।५५॥ वाष्कलिः पूर्वोक्तस्यवाष्कलस्यपुत्रः प्रतिशाखाभ्यः। उक्तसर्वशाखाभ्यः॥ वाला
यन्यादयस्तामादधुः। अधीतवंतः।५६॥ ऋक्शाखोपसंहारपूर्वकंतच्छ्रवणफलमाह॥ बह्वृचाइति एतच्छंदसां।५७॥ ३१

यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रस्तावमाह वैशंपायनशिष्या इत्यादिना चरकनामनिरुक्तिमाह । यस्माच्चेरुरिति ब्रह्महत्यांहः
गु क्षपयतीति तथा तस्य गुरोरनुष्ठेयं व्रतं तच्चरणाच्चरका इत्यर्थः ।५८। तच्छिष्यः स्वल्पसाराणामेतेषां चरितेन किय
त् सुदुश्चरमहं चरिष्यामीति ।५९। विप्राणामवमंत्रा अवज्ञाकर्त्ता मदधीतमाशु त्यजेति ।६०। देवरातसुतो याज्ञवल्क्यः
।६१। छर्दित्वा तस्यादानं विप्ररूपेणानुचितमिति तित्तिराः पक्षिविशेषा भूत्वाददुः ततश्च तैत्तिरीया इति प्रसिद्धाः सुपेशा।

वैशंपायनशिष्या वै चरकाध्वर्यवोभवन् ॥ यच्चेरुर्ब्रह्महत्यांहः क्षपणं स्वगुरोर्व्रतं ॥५८॥ याज्ञ
त्र वल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् ॥ चरितेनाल्पसाराणां चरिष्येहं सुदुश्चरं ॥५९॥ इत्युक्तो गु
रुरप्याह कुपितो याह्यलं त्वया ॥ विप्रावमंत्रा शिष्येण मदधीतं त्यजाश्विति ॥६०॥ देवरातसुतः सोपि
छर्दित्वा यजुषां गणं ॥ ततो गतोथ मुनयो ददृशुस्तान् यजुर्गणान् ॥६१॥ यजूंषि तित्तिरा भूत्वा तल्
लोलुपतयाददुः ॥ तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः ॥६२॥ याज्ञवल्क्यस्ततो ब्रह्मंश्छंदांसि
धिगवेषयन् ॥ गुरोरविद्यमानानि सूपतस्थेर्कमीश्वरं ॥६३॥

लास्त्वतिरम्याः ।६२। बहुवचनमवांतरभेदविवक्षया काण्वमाध्यंदिनशाखाप्रसंगमाह । याज्ञवल्क्य इत्यादिना । गुरौ वै
शंपायनस्य व्यासेन विभज्यानुक्तत्वाद् विद्यमानानि अधिकानि गवेषयन् स्वयमुपतस्थे सम्यक् तुष्टाव ईश्वरं वेदानां तथा चा
स्मातिश्रुतिः ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अह्नः सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सू
र्य इति ।६३।

ना० द्वा०
२२

नमोभगवतेतुभ्यंआदित्याययोभवानेकएवेमांलोकयात्रामनुवहतीत्यन्वयः॥तदेवद्रढयति॥अखिलजगतामात्म
स्वरूपेणचबहिरपिवर्तमानइति॥अखिलजगतामित्यस्यप्रपंचः॥चतुर्विधेतिहृदयांतर्वर्तित्वेपिद्रष्टृत्वेनोपाधिनाव्यव
धीयमानः॥अनाच्छाद्यमानः॥कालस्वरूपेणेत्यस्यप्रपंचः॥क्षणेतिक्षणलवादयोयेअवयवास्तैरुपचिताः॥संवत्सरास्ते
षांगणेनप्रत्यक्षमपामादानंशोषणंविसर्गोवृष्टिःताभ्यां॥अनेनगायत्रीप्रथमपादोक्तवरेण्यताऽनुवर्णिता॥६६

याज्ञवल्क्यउवाच॥ओंनमोभगवतेआदित्यायाखिलजगतामात्मस्वरूपेणकालस्वरूपेणचचतुर्वि
धभूतनिकायानां॥ब्रह्मादिस्तंबपर्यंतानांअंतर्हृदयेषुबहिरपिचाकाशइवोपाधिनाव्यवधीयमा।
नोभगवानेकएवक्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमांलोकया
त्रामनुवहति॥६६॥यदुहवावविबुधर्षभसवितस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमा।
नानामखिलदुरितवृजिनबीजावमर्जनभगवतः॥समभिधीमहितपनमंडलं॥६७॥

द्वितीयपादार्थोनुवर्णनेनस्तौति॥यदुहेति॥हेविबुधर्षभहेसवितः।यदम्पदोभगवतस्तवमंडलंतपतितत्समभिधीमहि
सम्यगाभिमुख्येनध्यायेमपुनस्तस्यैवसंबोधनं॥प्रत्यहंत्रिषवणंवैदिककर्ममार्गेणस्तुवतांभक्तानांयान्यखिलानिदुरि
तानितत्फलानिवृजिनानिदुःखानितेषांबीजमज्ञानंचतेषामवमर्जनेविनाशकहेतपनेति॥६७॥ २२

तृतीयपादेन स्तौति य इहेति यो भगवान् स्थावरजंगमसमूहानां स्वाश्रयाणां जीवानां मनइंद्रियप्राणगणान् अनात्मनो ऽज्ञा-
स्वयमात्मैवांतर्यामी सन् प्रचोदयति प्रवर्त्तयति ॥६६॥ तृतीयपादमेवं मंडलस्यपारयाव्याचक्षाणः स्तौति य एवेति य एक एव भ-
गवान् अतिकरालवदनो यो ऽधकारसंज्ञो ऽजगरग्रहस्तेन गिलितं अत एव मृतकमिव विचेतनं स्वधर्म्मो रक्ष्यं युष्मात्माव-
स्यातं प्रत्यक् प्रबलं तं देवश्रेयस्तस्मिन् प्रवर्त्तयति किंच यो भगवान् वैति। पतिरि वाटति गच्छति ॥६७॥ आज्ञापालेरिंडादि

य इह वा ऽवस्थिरचरनिकराणां निजनिकेतनानां मनइंद्रियासुगणान् अनात्मनः ॥ स्वयमात्मांतर्यामी प्र-
चोदयति ॥६६॥ य एवमेवं लोकमतिकरालवदनांधकारसंज्ञाजगरग्रहगिलितं मृतकमिव विचेतन-
मवलोक्यानुकंपया परमकारुणिक ईक्षयैवोत्थाप्याहरनुसवनं श्रेयसि स्वधर्माख्यात्मावस्थाने प्र- २६
वर्त्तयत्यवनियतिरिवासाधूनां भयमुदीरयन्नटति ॥६७॥ परितआशापालैस्तत्र तत्र कमलकोशां-
जलिभिरुपहृताहेणः ॥६८॥ अथ ह भगवंस्तव चरणनलिनयुगलं त्रिभुवनगुरुभिर्वंदितमहमयातयाम-
यजुःकाममुपसरामीति ॥६९॥

भिः कमलकोशयुक्तैस्तत्तुल्यैर्वांजलिभिः उपहृताहेणः दत्तार्घः ॥६८॥ यत एवंभूतस्त्वं ॥ अथ अतः ह स्फुटं अयातयामानि अ-
नैर्येणावद् अविज्ञातानि यजूंषि तत्कामोहं उपसरामि भजामि ॥६९॥ एवं स्तुतः प्रसादितश्च ॥७०॥ पंचदशशाखा याः । शनैरपरिमिते
यैर्यजुभिरकरोत समतैरिति पाठः स एव याज्ञवल्क्यः । तैर्यजुभिरकरोत ~~समतैरिति पाठ स एव याज्ञवल्क्यः तैर्यजुभिरकरोदि~~ तिडे

ङेग्रकृः अधीतवंतः रविणाश्वरूपेणावाप्तेभ्यः किशोरेभ्यः । वाजेनवेगेनवासंबद्धत्वात्तत्कृताः शाखा वाजसनीसंज्ञास्ताः
शाखाश्रुतिवा ॥११॥ सामशाखाविभागमाह । जैमिनेरिति ॥ तत्सुतः सुमंतुसुतः ताभ्यां पुत्रपौत्राभ्यां क्रमेणैकैकां प्राह ॥१२॥

सूत उवाच ॥ एवं स्तुतः स भगवान्वाजिरूपधरो हरिः ॥ यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥१०॥ य
जुर्भिरकरोच्छाखा दश पंच शतैर्विभुः ॥ जगृहुर्वाजसन्यस्ताः काण्वमाध्यंदिनादयः ॥११॥ जैमिनेः सा
मगस्यासीत्सुमंतुस्तनयो मुनिः ॥ सुन्वांस्तु तत्सुतस्ताभ्यामेकैकां प्राह संहितां ॥१२॥ सुकर्म्मा चा
पि तच्छिष्यः सामवेदतरोर्महान् ॥ सहस्रसंहिताभेदं चक्रे साम्नां ततो द्विज ॥१३॥ हिरण्यना
भः कौशल्यः पौष्पिंजिश्च सुकर्मणः ॥ शिष्यौ जगृहतुश्चान्य ॥ आवंत्यो ब्रह्मवित्तमः ॥१४॥

तच्छिष्यः जैमिनेः शिष्यः महान् ॥ अतिमेधावी सहस्रसंहितारूपं भेदं चक्रे साम्नां तं संहिताभेदं ततस्तदनंतरं ॥१३॥ सुक
र्म्मणः शिष्यौ एकः कौशल्यो हिरण्यनाभः ॥ पौष्यंजिर्मो मे के स्तौ जगृहतुः ॥ आवंत्य श्चान्यः । तस्यैव शिष्यः सोपि तं प्राह
॥१४

पौष्यंज्यावंत्ययोरपि चकाराद्धिरण्यनाभस्यापि पंचशतानि शिष्या आसन् ते तावतीः ॥ शाखाः पपाठ यं जगृहुः तानुदी
च्यान् सतः कालतः कांश्चित् प्राच्यांश्च प्रचक्षते इत्यर्थः ॥ यथोक्तं वैष्णवे उदीच्याः सामगाः शिष्यास्तस्य पंचशतं स्मृताः
हिरण्यनाभात्तावंत्यः ॥ संहिता येर्द्विजोत्तमैः ॥ गृहीतास्तेपि चोच्यंते पंडितैः प्राच्यसामगा इति । ७५ ॥ पुनरप्येते प्रा

उदीच्याः सामगाः शिष्या आसन् पंचशतानि वै ॥ पौष्यंज्यावंत्ययोश्चापि तांश्च प्राच्यान् प्रचक्षते । ७५ ॥
लौकाक्षिर्मांगलिः कुल्यः कुशीदः कुक्षिरेव च ॥ पौष्यंजिशिष्या जगृहुः संहितास्ते शतं शतं ॥ ७६ ॥
कृतो हिरण्यनाभस्य चतुर्विंशति संहिताः ॥ शिष्य ऊचे स्वशिष्येभ्यः शेषा आवंत्य आत्मवान् ॥ ७७ ॥
इति श्रीभागवते महापुराणे द्वादशस्कंधे वेदशाखाप्रणयनं षष्ठोध्यायः ॥ ६ ॥ श्री ॥

यासां सुकर्मणः शिष्याणां शिष्यांतरैः ॥ शाखा बाहुल्यं दर्शयति ॥ लौकाक्षिरिति द्वाभ्यां ॥ ७६ ॥ कृतो नाम हिरण्यना
भस्य शिष्यः स्वशिष्येभ्य ऊचे शाखाः अन्याश्चापि याः प्रसिद्धाः शाखाः ताश्चावंत्यः स्वशिष्येभ्य ऊच इति । ७७ ॥ इति द्वादश
स्कंधे षष्ठोध्यायः ॥ ६ ॥ ॥ सप्तमेऽथ वै विस्तारः पुराणस्य मनेनतः । पुराणलक्षणादीनि फलं भागवतः स्मृतेः ॥ १ ॥

भा०द्वा०
२७

क्रमप्राप्तमथर्ववेदविभागमाह ॥ शिष्यं कबंधनामानं स्वां स्वकीयां संहितां सोपि शिष्योपि तां द्विधा वि
भज्य तु कं वै लवे अथर्ववेदं समुनिः सुमंतुरमितद्युतिः । शिष्यमध्यापयामास कबंधं सोपि तं द्विधा कृत्वा तु वेददर्शाय तथा
पथ्याय प्रदत्तवानिति ॥ १ ॥ तत्र वेददर्शः स्वसंहितां चतुर्धा विभज्य चतुरः शिष्यानध्यापयामास पथ्यश्च त्रिधा विभज्य त्रीनिति
तानेव आह शौल्कायनिरिति ॥ २ ॥ आंगिरसः शुनकस्य शिष्यो बभ्रुः सैंधवायनश्च तत्र शुनकस्तं द्विधा कृत्वा एकां तु ब

सूत उवाच ॥ अथर्ववित्सुमंतुश्च शिष्यमध्यापयत्स्वकां ॥ संहितां सोपि पथ्याय वेददर्शाय चोक्तवान्
॥ १ ॥ शौल्कायनिर्ब्रह्मबलिर्मोदोषः पिप्पलायनिः ॥ वेददर्शस्य शिष्यास्ते पथ्यशिष्यानथो शृणु ॥ कुमुदः शुन
को ब्रह्मन् जाजलिश्चाप्यथर्ववित् ॥ २ ॥ बभ्रुः शिष्योथांगिरसः सैंधवायन एव च ॥ अधीयेतां संहिते द्वे सा
वर्ण्याद्यास्तथापरे ॥ ३ ॥ नक्षत्रकल्पः शांतिश्च कश्यपांगिरसादयः ॥ एते आथर्वणाचार्याः शृणु पौराणि
कान्मुने ॥ ४ ॥ त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ॥ वैशंपायनहारीतौ षड्वै पौराणिका इमे ॥ ५ ॥ अ
धीयंत व्यासशिष्यात् संहितां मत्पितुर्मुखात् ॥ एकैकामहमेतेषां शिष्यः सर्वाः समध्यगां ॥ ६ ॥

भ्रवे द्वितीयां संहितां प्रादात् ॥ सैंधवायनादीनां शिष्याः ॥ ३ ॥ नक्षत्रकल्पः शांतिः कल्पश्चेति द्वौ तदुक्तं नक्षत्रकल्पवेदानां संहितानां
तथैव च । चतुर्थः स्यादांगिरसः शांतिकल्पश्च पंचम इति नक्षत्रकल्पादीनां कर्तारस्तत्तन्नामभिरुच्यते ॥ ४ ॥ मत्पितुर्मुखादिति ।
प्रथमं व्यासः षट् संहिताः । कृत्वा मत्पित्रे रोमहर्षणाय प्रादात्तस्य च मुखादेते त्रय्यारुण्यादयः ॥ एकैकां संहितामधीय त एतेषां षण्णां शिष्योहं ताः सर्वाः समधीतवान् ॥ ६ ॥ २७

रामशिष्यो यो हृतव्रणः एवं चत्वारो वयं मूलसंहिता इत्यनेनततः॥ संहितावाकुल्यं सूचितं॥७॥ शुकपरीक्षित्संवादे निरूपित
मपि पुराणलक्षणं तद्देवकथनाय दर्शयति॥ पुराणेति॥८॥ अस्य विश्वस्य अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वंत
रेशानुकथा निरोधो मुक्तिराश्रय इत्यत्रोक्ते स्थानपोषणे वृत्तिरक्षाशब्दाभ्यामुच्येते। अंतराणि मन्वंतराणि वंशो वंश्यानु
चरितमिति॥ चईशानुकथाः संस्थानिरोधः॥ अनेनैवात्यंतिलयरूपामुक्तिरप्युक्ता हेतुशब्देनजीवा आश्रयवासनाशब्द

कश्यपोहं च सावर्णी रामशिष्योकृतव्रणः॥ अधीमहि व्यासशिष्यात् चत्वारो मूलसंहिताः॥७॥ पु
राणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितं॥ शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः॥८॥ सर्गो
स्याथ विसर्गश्च वृत्तिरक्षांतराणि च॥ वंशो वंश्यानुचरितं संस्था हेतुरपाश्रयः॥९॥ दशभिर्लक्ष
णैर्युक्तं पुराणं तद्विदो विदुः॥ केचित्पंचविधं ब्रह्मन् महदल्पव्यवस्थया॥१०॥

व्याख्याकृतयो गृहीताः॥९॥ दशभिरेतैर्लक्षणैर्युक्तं महापुराणं विदुः॥ केचित्पंचविधं सर्गश्च प्रतिसर्गश्च वंशो मन्वंत-
राणि च॥ वंशानुचरितं चेति पुराणं पंचलक्षणमिति॥ महापुराणं॥ अल्पं चेति व्यवस्थया यत्र दशापि लक्षणानि पृथक्-
निरूप्यंते तन्महापुराणं॥ यत्र त्वन्येषां पंचस्वेवांतर्भावस्य विवक्षा तदल्पमिति॥ व्यवस्थयेत्यर्थः॥१०॥

भा० द्वा०
२५

सर्गादिलक्षणानिव्याचष्टे ॥ अव्याकृतेत्यादिना प्रधानस्यगुणानांक्षोभात योमहान् तस्माद्यस्त्रिवृदहंकारस्तस्मा-
द्भूतमात्राणांसूक्ष्माणामिंद्रियाणां चतदर्थानांतद्देवतानांचसंभवः सर्गः कारणसृष्टिः सर्गइत्यर्थः उच्यतइत्य-
स्य यथापेक्षमुत्तरत्राप्यनुषंगः ॥११॥ विसर्गंव्याचष्टे पुरुषेणेश्वरेणानुग्रहीतानांएतेषांमहदादीनां पूर्वकर्मवा-
सनाप्रधानोयंसमाहारः कार्यभूतश्चराचरप्राणिरूपोबीजमिवप्रवाहापन्नोविसर्गउच्यतइत्यर्थः ॥ चराणांभू-

अव्याकृतगुणक्षोभान्महतस्त्रिवृतोहमः ॥ भूतसूक्ष्मेंद्रियार्थानांसंभवः सर्गउच्यते ॥११॥ पु
रुषानुग्रहीतानामेतेषांवासनामयः ॥ विसर्गोयंसमाहारोबीजाद्बीजंचराचरं ॥१२॥ वृत्तिर्भूता
निभूतानांचराणामचराणिच ॥ कृतास्वेननृणांतत्रकामाच्चोदनयापिवा ॥१३॥ रक्षाच्युताव
तारेहाविश्वस्यानुयुगेयुगे ॥ तिर्यङ्मर्त्यर्षिदेवेषुहन्यंतेयैस्त्रयीद्विषः ॥१४॥

तानांसामान्यतोचराणिचकाराच्चराणिचका[illegible]माहुतिः ॥ तत्रतुनृणांस्वेनस्वभावेनकामाच्चोदनयापिवायानियता-
वृत्तिः ॥ ईलीविकाकृतासावृत्तिरुच्यतइत्यर्थः ॥१३॥ तिर्यङ्मर्त्यर्षिदेवेषुयेच्युतावताराः । तेषामीहालीलासविश्वस्यरक्षोच्य-
तइत्यर्थः ॥ यैरवतारैरितिसमासान्निकृष्यकर्तृत्वेनसंबंधः त्रयीद्विषोदैत्याः ॥१४॥ षड्विधंमन्वंतरमुच्यतषड्विधत्व-
मेवाह ॥ २५

मनुरिति मन्वादयः ।। षडेते वर्गाः स्वाधिकारेण यदा प्रवर्त्तंते तं मन्वंतरमित्यर्थः ।। १५ । वंशमाह ब्रह्मणः सकाशात् प्रसू-
तिर्येषां शुद्धानामित्यर्थः ।। तेषामन्वयो वंशः ।। तत्र प्रधानरूपाः ते तेषां वृत्तं ये च वंशधरास्तेषां च वृत्तं वंशानुचरितमुच्यते
।। १६ ।। अस्य विश्वस्य मायातो निष्पन्नस्य स्वभावतो निष्पन्नस्य यद्वा मायातस्य चतुर्विधो लय इति ।। अस्यतु गतः ।। सर्गा-
देर्हेतुर्निमित्तं जीवः । सोत्र हेतुरुच्यत इत्यर्थः ।। तस्य निमित्ततामाह । अविद्याकर्मकारकः कर्मकर्त्ता जीवादृष्टप्रयुक्तः

मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ।। ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते ।। १५ ।। राज्ञां ब्र-
ह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ।। वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये ।। १६ ।। नैमित्तिकः
प्राकृतिको नित्य आत्यंतिको लयः ।। संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः ।। १७ ।। हेतुर्जीवो-
ऽस्य सर्गादेरविद्याकर्मकारकः ।। यं चानुशायिनं प्राहुरव्याकृतमुतापरे ।। व्यतिरेकान्वयो यस्य जा-
ग्रत्स्वप्नसुषुप्तिषु ।। मायामयेषु तद्ब्रह्म जीववृत्तिष्वपाश्रयः ।। १९ ।।

त्वादिरस्य सर्गादेः स तु तत्र हेतुरित्यर्थः ।। नन्वनुशायि निमित्तमिति केचित् अव्याकृतमित्यपरे तत्राह । यमिति चैतन्यप्राधा-
न्येनानुशायिनं ।। उपाधिप्राधान्यविवक्षयाऽव्याकृतं ।। १८ ।। अपाश्रयमाह ।। व्यतिरेकेति जाग्रदादिष्ववस्थासु जीवतया
वर्त्तत इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु मायामयेषु साक्षितयान्वयः ।। समाध्यादौ च व्यतिरेको यस्य तद्ब्रह्म स सा-
रप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रय उच्यत इत्यर्थः ।। १९ ।।

भा० द्वा० २६

तदेवसदृष्टांतंप्रपंचयति ॥ पदार्थेषुघटादिषुद्रव्यंमृद्रूपंयथायुतं । अन्वितंअयुतंचवहिरप्यवस्थानात्तद्रूपनामसुच
तन्मात्रंयथाएवंबीजंगर्भाधानमादिर्यासांपंचतांतानांतासुदेहावस्थासुनवस्वपिअधिष्ठानत्वेनसाक्षित्वेनचा
युतमयुतंचयत्तत्तदपाश्रयइति ॥ २० ॥ एवंदशापिलक्षणानिव्याख्यायवर्णयति महात्मानइतियदुक्तं तदाहविरमेते
ति ॥ यदासगर्भोदीत्तामायामयत्वानुसंधानेनवामदेवादेरिवस्वयमेवचित्तंविरमेतइहैवानुष्ठितेनयोगेनवादेवहू

पदार्थेषुयथाद्रव्यंतन्मात्रंरूपनामसु ॥ बीजादिपंचतांतासुह्यवस्थासुयुतायुतं ॥ २० ॥ विरमेतय
दाचित्तंहित्वावृत्तित्रयंस्वयं ॥ योगेनवातदात्मानंवेदेहायानिवर्त्तते ॥ २१ ॥ एवंलक्षणलक्ष्याणिपु पुराणानि
राणविदः ॥ मुनयोष्टादशप्राहुःक्षुल्लकानिमहांतिच ॥ २२ ॥ ब्राह्मंपाद्मंवैष्णवंचशैवंलैंगंसगारुडं ॥
नारदीयंभागवतमाग्नेयंस्कंदसंज्ञितं ॥ २३ ॥ भविष्यंब्रह्मवैवर्त्तंमार्कंडेयंसवामनं ॥ वाराहंमात्स्यंकौ
र्मंचब्रह्मांडाख्यमितित्रिषट् ॥ २४ ॥ ब्रह्मन्निदंसमाख्यातंशाखाप्रणयनंमुनेः ॥ शिष्यशिष्यप्रशि
ष्याणांब्रह्मतेजोविवर्द्धनं ॥ २५ ॥

त्यादिवत्तदाविक्षेपाभावादात्मानंवेदतदाचाविद्यानिवर्त्तेरीहायाः ॥ संसाररूपायाः ॥ निवर्त्ततेइत्यर्थः । २१ । पुराणविभा
गप्रस्तावेनतल्लक्षणादिप्रासंगिकमुक्त्वाप्रस्तुतमाह ॥ एवंविधैर्लक्षणैर्लक्ष्याणि । २२ । २३ । त्रिषट्अष्टादश । २४ । उ २६
पसंहरतिब्रह्मन्निदंमुनेर्व्यासस्यशिष्यादीनांचब्रह्मतेजोब्रह्मवर्चसंतद्विवर्द्धनंश्रोतॄणामितिशेषः । २५ ॥

इति द्वादशे सप्तमः ॥ अष्टमे तु तपश्चर्या मार्कंडेयस्य मोहके ॥ कामादिभिरसंमोहो नरनारायणस्तुतिः ॥२॥ पुराणविभागश्र
संगेन पुराणकर्तुर्मार्कंडेयस्य चरितं प्रस्तुतमाह ॥ सूतेति त्वमेव वक्तुं योग्य इत्याह ॥ तमसि संसारे भ्रमतां पारदर्शनस्तन्निवर्तकः
॥२॥ वक्तव्यमाह ॥ आयुरिति उर्वरितः अवशिष्टः ॥ येन कल्पांतेन एतत्कथं घटत इत्येकः ॥ प्रश्नः प्रलयांतावादप्येतन्न

॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे सप्तमोध्यायः ॥ ७ ॥ शौनक उवाच ॥ सूत जीव चिरं सा
धो वद नो वदतां वर ॥ तमस्यपारे भ्रमतां नृणां त्वं पारदर्शनः ॥ १ ॥ आहुश्चिरायुषमृषिं मृकंडतन
यं जनाः ॥ यः कल्पांते उर्वरितो येन ग्रस्तमिदं जगत् ॥ २ ॥ स वा अस्मत्कुलोत्पन्नः कल्पेस्मिन् भार्गवर्ष
भः ॥ नैवाधुनापि भूतानां संप्लवः कोपि जायते ॥ ३ ॥ एक एवार्णवे भ्राम्यन् ददर्श पुरुषं किल ॥ वटप
त्रपुटे तोकं शयानं त्वेकमद्भुतं ॥ ४ ॥ एष नः संशयो भूयान् सूत कौतूहलं यतः तं नश्छिंधि महा
योगिन् पुराणेष्वपि संमतः ॥ ५ ॥

घटत इत्याह ॥ स वा इति यतो भार्गवर्षभः कोपि प्राकृतिको नैमित्तिको वा ॥ ३ ॥ अन्यदप्यघटितमेवेत्याह ॥ एक एवेति तोकं
बालकं ॥ ४ ॥ कौतूहलं औत्सुक्यं तं संशयं न केवलं त्वं महायोगी किंतु पुराणेष्वपि ज्ञातृत्वेन संमतः ॥ ५ ॥

भा० द्वा० ८ प्रश्नमभिनंदति हे महर्षे अयं प्रश्नः तत्र हेतुः ॥ नारायणेति यत्र प्रश्नविषये ॥ ६ ॥ तत्र मार्कंडेयस्तपसा भगवंतमाराध्य मायाप्रदर्शि
२७ नं वव्रे तत्र स्मृते नैव भगवन्मायया सप्तकल्पाद्दृष्टाः ॥ नान्यैरित्युत्तरं वक्तुमादितः आरभ्य तस्य चरितमाह प्रागित्यादिना मार्कं
डेयो मृत्युं जिग्य इति पंचमश्लोकेनान्वयः ॥ मध्यमग्रंथेन तद्धर्मः कथ्यते प्राप्तो द्विजातिसंस्कारः ॥ उपनयनाख्यो येन सः ॥

सूत उवाच ॥ प्रश्नस्त्वया महर्षेयं कृतो लोकभ्रमापहः ॥ नारायणकथा यत्र गीता कलिमलापहा ॥ ६ ॥
प्राप्तद्विजातिसंस्कारो मार्कंडेयः पितुः क्रमात् ॥ छंदांस्यधीत्य धर्मेण तपःस्वाध्यायसंयुतः ॥ बृहद्व्रत
धरः शांतो जटिलो वल्कलांबरः ॥ बिभ्रत्कमंडलुं दंडमुपवीतं समेखलं ॥ ८ ॥ कृष्णाजिनं साक्षसूत्रं कुशांश्च
नियमर्द्धये ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन् संध्ययोर्हरिं ॥ ९ ॥ सायं प्रातः स गुरवे भैक्ष्यमाहृत्य वाग्यतः
बुभुजे गुर्वनुज्ञातः सकृन्नो चेदुपोषितः ॥ १० ॥ एवं तपःस्वाध्यायपरो वर्षाणामयुतायुतं ॥ आराधयन्
हृषीकेशं जिग्ये मृत्युं सुदुर्जयं ॥ ११ ॥ ब्रह्मा भृगुर्भवो दक्षो ब्रह्मपुत्राश्च ये परे ॥ नृदेवपितृभूतानि तेनास
न्नतिविस्मिताः ॥ १३ ॥ इत्थं बृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजं योगी ध्वस्तक्लेशांतरात्म
ना ॥ १४ ॥

पितुः सकाशात् गर्भाधानादिक्रमात् छंदांसि वेदान् ॥ ७ ॥ बृहद्ब्रह्मचारी सन् ॥ ८ ॥ नियमर्द्धये धर्मवृद्धये अग्न्या
दिषु पंचसु हरिमर्चयन् ॥ ९ ॥ नेदं गुरवे भैक्ष्यमाहृत्य तेनानुज्ञातश्चेत्तर्हि बुभुजे चेत्स कदाचिदुपोषितो भवति ॥ १० ॥ ११ ॥ तेन मृत्युं २७
जयेन ॥ १२ ॥ ध्वस्ताः क्लेशा रागादयो यस्य तेन ॥ अंतरात्मना प्रत्याहृतेन मनसा ॥ १३ ॥

तस्य तयोनिस्थामिति हासेन वर्णयति ॥ एतदित्यादिना ॥ अस्मिन् सप्तमे मन्वंतरे तपसा मत्परं आहिष्यतीति विज्ञं कितः ॥२५॥ मुन
ये मुनिभिर्ज्ञाधितुं रजसमा[illegible]त्तोकं अतिप्रियमपत्यं लोभः मदस्खलितो ॥२६॥२७॥ तदाश्रमपदं प्रविष्टो वायुर्वैवाविति त्वती येना
न्वयः पुष्पद्रुमैर्ललतानिष्कांचितं रञ्जितं पुष्पाद्द्विजानाम् श्रीणां कुलैराकीर्णं पुष्पापुष्पगुल्मलताजलाशया यस्मि

तस्यैवं पुडतस्त्रिवतं महायोगेन योगिनः ॥ व्यतीयाय महान्कालो मन्वंतरषडात्मकः ॥२४॥ एतत्सुरेंद्रो
ज्ञात्वा सप्तमेस्मिन्नकिलांतरे ॥ तपोविघ्नं कितो ब्रह्मन्नारेभे तद्विघातनं ॥२५॥ गंधर्वाप्सरसः कामवसंत
मलयानिलो ॥ मुनये प्रेषयामास रजस्तोकमुदो तथा ॥२६॥ तेवेतदाश्रमं जग्मुर्हिमाद्रेः पार्श्वउत्तरे
पुष्पभद्रा नदी यत्र चित्रारव्या च शिला विभो ॥२७॥ तदाश्रमपदं पुण्यं पुण्यद्रुमलताचितं ॥ पुण्यद्विज
कुलाकीर्णं पुण्यामलजलाशयं ॥२८॥ मत्तभ्रमरसंगीतं मत्तकोकिलकूजितं ॥ मत्तवर्हिनटाटोपं मत्तद्वि
जकुलाकुलं ॥२९॥ वायुः प्रविश्य आदाय हिमानिर्झरशीकरान् ॥ सुमनोभिः परिष्वक्तो ववावुत्तंभयन्स्म
रं ॥२०॥

न् ॥२८॥ मत्तभ्रमराणां संगीतं यस्मिन् मत्तवर्हिणाएव नटास्तेषामाटोपः संभ्रमो यस्मिन् ॥ मत्तद्विजानां पक्षिणां कुलै
राकुलं व्याप्तं ॥२९॥ एवंभूतं तदाश्रमपदं प्रविष्टः सन्वायुर्मलयानिलो ववौ प्रसारउत्तंभयन् । उद्दीपयन् तत्र वर्त्तसे पुष्पवेशा
न्मादाय हिमनिर्झरकणानामादानात् शैत्यं पुष्पपरिष्वंगात् सौगंध्यं चोक्तं ॥२०॥

किंच उपघ्नं डोयस्मिंस्तन्निशावक्रूं रजनीसुखं यस्मिन्नसः ॥ प्रवालस्तवकानां मालयः श्रेणयो येषु तैः पुष्पैतिविटपैः ॥
संश्लिष्यंतीति गोपाद्रुमा ॥ लताश्च तेषां जालैः समूहैः आविर्बभूव ॥ २२ ॥ किंच तदा गीतवादित्रप्रथिके ॥ गायकादिस
मुदायिभिः ॥ गंधर्वैरन्वीयमानः ॥ तयास्वस्त्रियोप्सरसस्तासां दृश्यपतिः ॥ आत्तः चापमिषुश्च येन सः स्मरश्च तत्राद

उपघ्नं च इनिशावक्त्रः प्रवालस्तवकालिभिः ॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः ॥ २२ ॥ अ
न्वीयमानो गंधर्वैर्गीतवादित्रयूथिकैः ॥ अदृश्यतात्तचापेषुः स्वःस्त्रीयूथपतिः स्मरः ॥ २३ ॥ दृष्ट्वा
त्वाग्निं समुपासीनं ददृशुः शक्रकिंकराः ॥ मीलिताक्षं दुराधर्षं मूर्तिमंतमिवानलं ॥ २४ ॥ ननृतुस्तस्य
पुरतः स्त्रियो थो गायकाद्गुः ॥ मृदंगवीणापणवैर्वाद्यं चक्रुः ॥ २५ ॥ संदधे स्त्रं स्वधनुषि कामः पंच
मुखं तदा ॥ मधुर्मनोरजस्तोक इंद्रभृत्याविकंपयन् ॥ २६ ॥ क्रीडंत्याः पुंजिकस्थल्याः कंदुकैः स्तनगौ
रवात् ॥ भृशमुद्विग्नमध्यायाः केशविस्रंसितस्रजः ॥ २६ ॥ इतस्ततो भ्रमद्दृष्टेश्चलंत्या अनुकंदुकं ॥ वायु
र्जहार तद्वासः सूक्ष्मं त्रुटितमेखलं ॥ २७ ॥ विससर्ज तदा बाणं मत्वा तं स्वजितं स्मरः ॥ सर्वं तत्राभवन्मोघम
नीशस्य यथोद्यमः ॥ २८ ॥

मनोरमं

अपत ॥ २२ ॥ दुराधर्षं अभिभवितुं ॥ अशक्यं ॥ २३ ॥ २४ ॥ शोषणादीपनसंमोहनतापनोन्मादना
ख्यानि पंचमुखानि यस्य तदस्त्रं संदधे ॥ तदैव मधुर्वसंतः ॥ रजस्तोकं अपि पुंस्त्वमार्दवे अन्यच्चेंद्रभृत्यास्तस्य मनो विकंपयन् ॥ २५ ॥
किंच ॥ वायुर्मलयानिलः पुंजिकस्थल्याः तत्सूक्ष्मं वासो जहार ॥ २७ ॥ सर्वं तेषां कर्म तत्र तस्मिन्मोघं व्यर्थं अनीशस्य नि

मुनेरपकुर्वतः ॥ प्रतिकूलमाचरंतः हे मुने ॥ २९ ॥ अहमः अहंकारस्यभावेविकारो ॥ ३० ॥ निस्तेजसं म्लानवदनं खराडिंडः ॥ ३१ ॥
नरनारायणरूपो हरिः ॥ ३२ ॥ तावनुवर्णयति द्याभ्यां गौरवं कृष्णाजिनं वल्कलं चांबरं ययोस्तौ पवित्रे पाणौ ययोः ॥ तौ त्रि
वृत् त्रिगुणं नवतंतुकमितिवा त्रिवृद्वहिः ॥ पंचमानमित्यादौ नवके प्रयोगात् इतिनवतत्वादिमयं ॥ ३३ ॥ वेदं च दर्भमुष्टिं कि

तदिच्छमपकुर्वतो मुनेस्तत्तेजसा मुने ॥ दह्यमानानिवर्तंतु प्रबोध्याहिमिवार्भकाः ॥ २९ ॥ इतींद्रानुच
रैर्ब्रह्मन्धर्षितोपि महामुनिः ॥ यन्नागादहमोभावं न तच्चित्रं महत्सु हि ॥ ३० ॥ दृष्ट्वा निस्तेजसं का
मं सगणं भगवान्स्वराट् ॥ अत्वानुभावं ब्रह्मर्षेर्विस्मयं समगात्परं ॥ ३१ ॥ तस्यैवं युंजतश्चित्तं तपः
स्वाध्यायसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणो हरिः ॥ ३२ ॥ तौ शुक्लकृष्णौ नवकंजलोचनौ
चतुर्भुजौ रौरववल्कलांबरौ ॥ पवित्रपाणी उपवीतकं त्रिवृत्कमंडलुं दंडमृजुं च वैणवं ॥ ३३ ॥
पद्माक्षमालामुतजंतुमार्जनं वेदं च साक्षात्तप एव रूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषा प्रांशू
दधानौ विबुधर्षभार्चितौ ॥ ३४ ॥

च साक्षात्तप एव तौ तत्र हेतुः ॥ तपत्तडिद्वर्णो दीप्यमानविद्युत्संकाशं यत्पिशंगरोचिस्तेन ॥ रूपिणो मूर्तिमंतौ तादृक्तेजो
युक्तस्तात्तिभ्यां तपोमयत्वेन प्रकाशमानावित्यर्थः ॥ प्रांशू उन्नतौ ॥ ३४ ॥

मा०टी० २९

उत्थे सहता आदरेण ॥ ३५ ॥ तयोः संदर्शनेन य आनंदस्तेन निरंतरां उपर्शो तां आत्मेंद्रियाश्रयादेहे इंद्रियमनांसि यस्य सः
नसेहेनाश्च क्लोत ॥ ३६ ॥ आश्लिषन् आलिंगयन्निव ॥ ३७ ॥ पादयोरवनिज्य पाद्योधस्तल्य अर्हणेन अर्घेण ॥ ३८ ॥ पादावान्
म्य गरिष्ठो एतद्युतमौ तौ प्रति ॥ ३९ ॥ अत्र तयोमिनस्तस्यैव प्रवर्तकत्वादात्मनस्तत्स्तुतावस्वातंत्र्यं प्रपन्नाह किमिति हे वि
भोतव त्वां किं अहं वर्णये कथं स्तोमियत येनत्वयैव उदीरितः ॥ प्रेरितो सुः प्राणः स स्पंदते प्रवर्त्तते तं तमनुच वागादयः

ते वै भगवतो रूपे नरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेन दंडवत् ॥ स तत्संदर्शनानंदनिर्वृ
तात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षो न सेहे तावुदीक्षितुं ॥ ३६ ॥ उत्थाय प्रांजलिः प्रह्व औत्सुक्या
दाश्लिषन्निव ॥ नमो नम इतीशानौ बभाषे गद्गदाक्षरः ॥ ३७ ॥ तयोरासनमादाय पादयोरवनिज्य च ॥ अ
र्हणेनानुलेपेन धूपमाल्यैरपूजयत् ॥ ३८ ॥ सुखमासनमासीनौ प्रसादाभिमुखौ मुनी ॥ पुनरानम्य पा
दाभ्यां गरिष्ठाविदमब्रवीत् ॥ ३९ ॥ मार्कंडेय उवाच ॥ किं वर्णये तव विभो यदुदीरितो सुः संस्पंदते तमनु
वाङ्मन इंद्रियाणि ॥ स्पंदंति वै तनुभृतामजशर्वयोश्च स्वस्याप्यथापि भजतामसि भावबंधुः ॥ ४० ॥

स्पंदंति अत्र हेतुः ॥ वै अन्वयव्यतिरेकाभ्यां श्रोत्रस्य श्रोत्रमित्यादि श्रुतिभिश्च तत्प्रसिद्धमित्यर्थः ॥ न केवलं प्राकृतानां तनुभृतां ॥
किंतु अजशर्वयोश्च अतः स्वस्य ममापि तथैव एवं यद्यपि न कश्चिदपि कस्यापि स्वातंत्र्यं तथापि दारुयंत्रवत् प्रवर्त्ततेरपि वा
गादिभिर्भजतां पुंसां भावबंधुः ॥ आत्मबंधुरसि न तु पित्रादिवद्देहमात्रबंधुः अहो कृपालुता तत्त्वमित्यर्थः ॥ ४० ॥ २९

ननु कथमेवं ब्रह्मादि प्रवर्तकौ धर्म्मेपुत्रत्वादावयोरिति चेत्तत्राह। मर्त्तो इति॥ हे भगवन्भगवतस्तव इमे मर्त्त्यौ त्रिलोक्याः
क्षेमायपालनायतापविरमाय दुःखनिवृत्त्यै मृत्युजित्यै मोक्षाय वा न तु त्वं कस्यापि पुत्र इत्यर्थः॥ अत्र हेतुः। य एतद्विश्वंभा
वितुं अन्यास्तन्नर्मत्स्यकूर्मादिलक्षणाः नानाअनेकप्रकारा विभाषि तद्धतन केवलं पालनादिमात्रं तवकर्म किंतु सृष्टिस्थि
प्रलयावपीत्याह॥ सृष्टेति॥ तत्राप्यनिरपेक्षत्वे हेतुः ऊर्णनाभिरिवेति।६१॥ यस्मादेवंभूतस्त्वं तस्मात्तवांघ्रिमूलं भजा

मर्त्तोऽइमे भगवतो भगवंस्त्रिलोक्याः क्षेमायताप विरमाय च मृत्युजित्यै॥ नानाविभर्ष्यवितुमन्यतनू
र्यथेदं सृष्ट्वा पुनर्ग्रससि सर्वमिवोर्णनाभिः॥१॥ तस्मादवितुः स्थिरचरेशितुरंघ्रिमूलं यत्स्थं न कर्मगुणका
लरजः स्पृशंति। यद्वै स्तुवंति निनमंति यजंतिभीक्ष्णं ध्यायंति वेदहृदया मुनयस्तदाप्त्यै॥६२॥

मीत्याह तस्येति तस्यावितुः॥ पालकस्य स्थावरजंगमानामीश्वरस्य अंघ्रिमूलं भजामेति तृतीयश्लोकस्यानुषंगः॥ कथंभूतं
मंघ्रिमूलं यत्स्थं यत्रस्थितं कर्मगुणकालानां रजो मलं स्पृश्यं च एवोक्ता स्तापादयो न स्पृशंति हन्त इति॥ वा पाठः॥ यतः
वेदो हृदये येषां ते वेदतात्पर्यविदो मुनयः॥ यद्वै स्तुवंति नितरां नमंति तत्प्राप्तये एवस्तवनादिकुर्वंति।६२॥

ना० द्वा०
३०

यतस्त्वन्यः पुरुषार्थो नास्तीत्याह॥ नान्यमिति॥ त्वदंघ्र्युपानयात् श्रीमच्चरणप्राप्तेः॥ अन्यं क्षेमं॥ न विद्मः। परितः सर्वेष्वपि लोकेषु भीर्यस्य तस्य जनस्य तदेवाह। द्विपरार्धं धिष्ण्यं स्थानं यस्य सः॥ ब्रह्मापि ते कालस्य त्वद्भ्रूविजृंभरूपात् कालादलं बिभेति अतः किं पुनर्वक्तव्यं तेन ब्रह्मणा कृतानां भौतिकानां प्राणिनां भयमिति। ४३॥ यस्मादेवं तस्मात् तव पादमूलं भजामि कथंभूतस्य ऋतधियः। सत्यज्ञानस्वरूपस्य। यद्वा सत्या धीर्यस्य यस्मिन्॥ वा तस्य आत्मगुरोर्जीवस्य नियंतुः अ

नान्यं तवांघ्र्युपनयादपवर्गमूर्त्तेः॥ क्षेमं जनस्य परितोभिय ईश विद्मः॥ ब्रह्मा बिभेत्यलमतो द्विपरार्द्धधिष्ण्यः कालस्य ते किमुत तत्कृतभौतिकानां॥ ४३॥ तद्वै भजाम्यृतधियस्तव पादमूलं हित्वेदमात्मच्छदि चात्मगुरोः परस्य॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रं विंदेत ते तर्हि सर्वमनीषितार्थं॥ ४४॥

तः कारणात् परस्य किं कृत्वा आत्मच्छदि स्वात्मावरकं अपार्थं च निष्फलं असच्च तुच्छं अंत्यं च नश्वरं इदं देहादि हित्वा देहादिभजनं त्यक्त्वा अस्मत्सेवकत्वं प्रतीयते तत्राह॥ अभिज्ञमात्रं नह्यत्य तमसत् किं त्वात्ममात्रं ननु ततः। एषु गुस्तीत्यर्थः॥ ननु अपवर्गीयं न भवतु मद्भजनं फलांतरार्थं त्वद्भजनं कार्यमेव तत्राह तर्हीति॥ यदि त्वां भजति पुरुषः। तर्हि ते त्वत्त एव सर्वमनीषितमर्थं विंदेतेति॥ ४४॥ ३०

ननुब्रह्मरुद्रावपिममैवमूर्त्तीअतोमामेवकिमत्यंतमद्रियसेतत्राह॥सत्वमिति॥यद्यपियद्यपितवैवमाययाकृताएतालीलाःत्व
यैवधृताःतथापियासत्वमयीसैवप्रशांत्यैमोक्षायनकेवलंअस्यप्रशांतभावमात्रमन्यभद्रतेकिंत्वनिष्टंचकिंतदनिष्टंभवेदित्याहव्या
सनेति।४४।तदेवसदाचारेणद्रढयतितस्मादितिहेभगवन्नतवशुक्लांतांतनुंश्रीनारायणाख्यांअथतावकानांचशुक्लांतनुंन

सत्वंरजस्तमइतीशतवात्मबंधोमायामयाः॥स्थितिलयोदयहेतवोस्यलीलाधृतायदपिसत्वमयीप्रशांत्यै
नाऽन्येवरणांव्यसनमोहभियश्चयाभ्यां।४४॥तस्मात्स्वेहभगवन्नथतावकानांशुक्लांतनुंस्वदयितांकुशला
भजंति।यस्मात्सात्वताःपुरुषरूपमुशंतिसत्वंलोकेयतोऽभयमुतात्मसुखंचनान्यत॥४५॥तस्मैनमोभगवते
पुरुषायमहात्मनेविश्वायविश्वगुरवेपरदेवतायै॥नारायणायऋषयेचनरोत्तमायहंसायसंयतगिरेनिग
मेश्वराय॥४६॥

राख्यांयद्यस्मात्सात्वताःसत्वमेवपुरुषस्येश्वरस्यरूपमुशंतीतिमन्यंतेनत्वन्यत्रजस्तमश्चेति॥अत्रहेतुःयतःसत्वात्लोकोवैकुंठा
ख्यः लोकत्वेसत्यप्यभयंचभोगेसत्यप्यात्मसुखंच।४५॥अथकस्तंप्रणमतितस्मैनमइतिहंसायशुद्धायसंयतगिरेनियतवाचे॥अथ
चनिगमेश्वरायवेदमार्गप्रवर्तकाय॥४६॥

वेदार्थे संप्रदायप्रवर्त्तने हेतुत्वं वदन् स्तौति यमिति कपटेंद्रियमार्गैर्भ्रमद्धीः विक्षिप्तबुद्धिः पुमान् स्वेंद्रियादिषु नियंतृत्वेन संतम॰
पि यं त्वां न वेद दृष्ट्वा षु विषयेषु बुद्धिविक्षेपे हेतुः । तन्मायया तस्य तवैव मायया आवृता आत्मनि स्थामानि येस्य सत्त्वोपि आद्यए
व एवं महाज्ञाते वे अखिलगुरोस्तव त्वत्प्रवर्तितं वेदमुपसाद्य प्राप्य तत्त्वं साक्षाद्वेद ॥ ४७ ॥ वेदेनैव तत्त्वज्ञानमित्युपपादयन् प्रण॰

यं वै न वेद वितथाक्षपथैर्भ्रमद्धीः संतं स्वखेष्वसुषु हृद्यपि दृक्पथेषु ॥ तन्माययावृतमतिः स उ एव साक्षादाद्य
स्तवाखिलगुरोरुपसाद्य वेदं ॥ ४७ ॥ यद्दर्शनं निगममात्मरहःप्रकाशं मुह्यंति यत्र कवयोऽजपरा य
तंतः ॥ सर्ववादविषयप्रतिरूपशीलं वंदे महापुरुषमात्मनिगूढबोधं ॥ ४८ ॥ इति श्रीभागवते महा
पुराणे द्वादशस्कंधे अष्टमोध्यायः ॥ ८ ॥ ॥ श्रीराधाकृष्णाय नमः ॥ श्री राम ॥

मतिर्यस्य तत्र यद्दर्शनं निगमे भवति ॥ कथंभूतमात्मनस्तव रहः ॥ रहस्य प्रकाशकं अजनस्य पाडुर्ज्ञेयतामाह ॥ अजपरा ब्रह्मप्रमुखाः 
 कवयः अपि सांख्ययोगादिभिर्यतमानाः ॥ यत्र त्वयि मुह्यंति कुत इत्यत आह ॥ सर्वेषां सांख्यादिवादानां विषयाभेदाद् यस्तेषां प्रा॰
तिरूप तत्तदनुसारि शीलस्वभावो यस्य तं कुतः ॥ आत्मना देहादिसंघातेन निगूढो बोधो यस्य तं एवंभूतं महापुरुषं त्वां वंदे ॥ ४८

नवमेभगवन्मायादिदृक्षोर्दर्शनंमुनेः मायाशिशोर्हरेर्यादौ वृमुनेर्निर्वेशनिर्गमैः ॥१॥ भगवतः परितोषपूर्वकं स्वेप्सितवरदानं कथ
यितुमाह संस्तुतस्तुत इत्यादिना ॥१॥ आत्मसमाधिनाचित्तैकाग्र्येण ॥२॥ वयं ते परितुष्टाः स्मेति वक्तुं वचनं सर्वदेवाभिप्रायेण
वरदेशादित्येकवचनं च योगैश्वर्याभिप्रायेण प्रतीच्छ गृहाण ॥३॥ वरेणछंदयता त्वयाजितं तत्कथं दर्शितः ॥ ममतुवराकां-

सूत उवाच ॥ संस्तुतो भगवानित्थं मार्कण्डेयेन धीमता नारायणो नरसखः प्रीत आह भृगूद्वहं ॥१॥ श्रीभ
गवानुवाच ॥ भो भो ब्रह्मर्षिवर्योसि सिद्ध आत्मसमाधिना मयि भक्त्याऽनपायिन्या तपःस्वाध्यायसंयमैः ॥२॥
वयं ते परितुष्टाः स्मत्वद्बृहद्व्रतचर्यया वरं प्रतीच्छ भद्रं ते वरदेशात्वदीप्सितं ॥३॥ ऋषिरुवाच ॥ जितं ते
देवदेवेश प्रपन्नार्तिहराच्युत वरेणैतावताऽलं नो यद्भवान्समदृश्यत ॥४॥ गृहीत्वाजादयो यस्य श्रीमत्पा
प दाब्जदर्शनं मनसा योगपक्वेन स भवान्मेऽक्षिगोचरः ॥५॥ अथाप्यंबुजपत्राक्ष पुण्यश्लोकशिखाम
णे ॥ द्रक्ष्ये मायां यया लोकः सपालो वेद सद्भिदां ॥६॥

दानास्तीत्याह वरेणेति ॥४॥ यस्य च श्रीमत्पादाब्जदर्शनं मनसाऽपि गृहीत्वा प्राप्य कृतार्था अजादयो भवंति स भवान्मेऽक्षिगो
वरो जातोस्ति किमतः ॥ परंवरेणेत्यर्थः ॥५॥ द्रक्ष्ये द्रष्टुमिच्छामि लोकपालैर्ब्रह्मादिभिः सहितोऽयं लोको जनः सद्भिदां सतिवस्तुनि
भिदां ययेति ॥६॥

मा० द्वा० ३२ तथेति हृष्टः सौनिरीश्वरः स्मयन्नागात् पार्श्वं तरेकियाविशेषणं ॥७॥ तमेवार्थं मायादर्शनरूपं अग्न्यादिमूर्तिषु ॥८॥ तावद्व्योमे
नोमयेऽद्भ्येः क्वचित्कलाविलप्रेमप्रसरसंप्लुतः प्रेमोद्रेकः प्राप्तः ॥९॥ मायादर्शनमाह ॥ तस्यैत्यादिना ॥१०॥ तं वायुमनु वला
हका मेघा अभवन् आविर्बभूवुः ॥ ते च तडिद्भिः सहिता उच्चैः स्वनंतो घड्डौतः अस्नोर गर्जंतद्वत्स्थविष्ठाः ॥ अभितो वर्षे॥

सूत उवाच ॥ इतीडितोर्चितः काममृषिणा भगवान्मुने ॥ तथेति स स्मयन्प्रागाद्बदर्याश्रममीश्वरः ॥ ७ ॥
तमेव चिंतयन्नर्थमृषिः स्वाश्रम एव सः वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ॥८॥ ध्यायन्सर्वत्र च हरिं भावद्र
व्यैरपूजयत् क्वचित्पूजां विसस्मार प्रेमप्रसरसंप्लुतः ॥९॥ तस्यैकदा भृगुश्रेष्ठ पुष्पभद्रातटे मुनेः ॥ उपासीन
स्य संध्यायां ब्रह्मन्वायुरभून्महान् ॥१०॥ तं चंडशब्दं समुदीरयंतं बलाहका अन्वभवन्करालाः ॥ अक्षस्थविष्ठा
मुमुचुस्तडिद्भिः स्वनंत उच्चैरभिवर्षधाराः ॥११॥ ततो व्यदृश्यंत चतुः समुद्राः समंततः क्ष्मातलमाग्रसंतः ॥ समीर
वेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः ॥१२॥ अंतर्बहिश्चाद्भिरतिद्युभिः खरैः ॥ शतह्रदाभीरुपता
पितं जगत् चतुर्विधं वीक्ष्य सहात्मना मुनिर्जलाप्लुतां क्ष्मां विमनाः समत्रसत् ॥१३॥

धारा मुमुचुः ॥११॥ चतुर्दिक्षु वर्तमानाः समुद्राः समीरवेगोत्तोर्मयस्तैर्भूतलं ग्रसंतः ॥ उग्रा नक्रा येषु महाभया आवर्ता येषु गंभी
रो घोषो येषु ते च ते च ॥१२॥ आत्मना सह जरायुजादि चतुर्विधं जगत् अंतर्बहिश्चोपतापितं वीक्ष्य क्ष्मां च जलाप्लुतां वीक्ष्य मुनिः स ३२
मत्रसत् ॥ तं च प्रापकेनोपतापितं अद्भिः अतिद्युभिः ॥ अतिक्रांता द्यौर्याभिः ॥ खरैः खरस्पर्शैः सूर्यरश्मिभिः वायुभिर्वेति शेषः शतह्रदाभि
र्विद्युद्भिः दीर्घमार्षं छंदोनुसारेण ॥१३॥

प्रभंजनेनाघूर्णितं प्रकंपितं वाः उदकं यस्मिन् सः अप्यधात् छादयामास समं सह ॥२४॥ सक्ष्मांतरिक्षं भूम्यंतरिक्षस्थप्राणिसहि
तं सदिवं स्वर्गस्थदेवसहितं भगणः ज्योतिर्गणाः तैः सहितं जडा विक्षिप्य विकीर्य ॥२५॥ परिश्रमेण ईषितः ॥ व्याप्त इत्यर्थः क्षुधुसं
पीडित इत्यर्थात् ॥२६॥ अन्योन्यघातिभिः तद्भक्षणाय परस्परं युध्यद्भिः ॥२७॥२८॥ वि मायावृतात्म नह्ति सतणाह स्थानि ष्णु

तस्यैवमुद्वीक्षत ऊर्मिभीषणः प्रभंजनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणो वर्षद्भिरंबुदैः
क्ष्मामप्यधाद्द्वीपवर्षाद्रिभिः समं ॥२४॥ सक्ष्मांतरिक्षं सदिवं सभागणं त्रैलोक्यमासीत्सह दिग्भि
राप्लुतं ॥ स एक एवोर्वरितो महामुनिर्बभ्राम विक्षिप्य जडांधवत् ॥२५॥ क्षुत्तृट्परीतो मकरैस्तिमि जटाः
गिलैरुपद्रुतो वीचिनभस्वताहतः ॥ तमस्यपारे पतितो भ्रमन्दिशो न वेद खं गां च परिश्रमेषितः
॥२६॥ क्वचिद्गतो महावर्ते तरलैस्ताडितः क्वचित् ॥ यादोभिर्भक्ष्यते क्वापि स्वयमन्योन्यघातिभिः ॥२७॥
क्वचिन्मोहं क्वचिच्छोकं क्वचिद्दुःखं सुखं भयं ॥ क्वचिन्मृत्युमवाप्नोति व्याध्यादिभिरुतार्दितः ॥२८॥ अयुतायुत
वर्षाणां सहस्राणि शतानि च ॥ व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः ॥२९॥ स कदाचित्भ्रमंस्तस्मि
न्पृथिव्याः ककुदि द्विजः ॥ न्यग्रोधपोतं ददृशे फलपल्लवशोभितः ॥३०॥

वर्षैः ॥२९॥ ककुदि ॥ उन्नत ॥ प्रदेशे ॥ न्यग्रोधपोतं ॥ कोमलं ॥ वटं ॥३० ॥ ३० ॥ श्री ॥

सि

भा० द्वा० तस्याः ईशानदिग्भागस्थायां शाखायां शिशुमपि ॥२२॥ श्रीमन्नरमं वदनपंकजं यस्य तं कंबुवत् त्रिरेखावृता ग्रीवा यस्य तं महोरस्कं विशाल
३३ व॥क्षःस्थलं सुनासं शोभना नासा यस्य तं सुंदरे भ्रुवौ यस्य तं ॥२२॥ श्वासैरेजंतः कंपायमाना अलकास्तैराभातं शोभितं कंबुवत्त । श्रुता
वंल्लेयेन श्रीययोः तौ कंबुश्रियौ तयोः ॥ कर्णयोर्दाडिमपुष्पे यस्य तं विद्रुमतुल्याऽधरभासा ईषत् शोणायितं सुधातुल्यं स्मितं

प्राग्गुत्तरस्यां शाखायां तस्यापि ददृशे शिशुं शयानं पर्णपुटके ग्रसंतं प्रभया तमः ॥२२॥ महामरकतश्याम
श्रीमद्वदनपंकजं कंबुग्रीवं महोरस्कं सुनासं सुंदरभ्रुवं ॥२२॥ श्वासैजदलकाभातं कंबुश्रीकर्णदा
डिमं विद्रुमाधरभासेषच्छोणायितसुधास्मितं ॥२३॥ पद्मगर्भारुणापांगं हृद्यहासावलोकनं ॥ श्वा
सैजद्वलिसंविग्ननिम्ननाभिदलोदरं ॥२४॥ चार्वंगुलिभ्यां पाणिभ्यामुन्नीय चरणांबुजं मुखे निधाय वि
प्रेन्द्रो धयंतं वीक्ष्य विस्मितः ॥२५॥ तद्दर्शनाद्वीतपरिश्रमो मुदा प्रोत्फुल्लहृत्पद्मविलोचनांबुजः प्र
हृष्टरोमाद्भुतभावशंकितः प्रष्टुं पुरस्तं प्रससार बालकं ॥२६॥

यस्य तं ॥२३॥ पद्मगर्भवत् आ ईषत् अरुणाव पांगौ नेत्रांतौ यस्य तं हृद्यो हासो यस्मिन् तत् अवलोकनं यस्य तं श्वासैरेजंत्यश्चलं
तो वलयस्त्रिवल्यस्ताभिः । संविग्नाश्चंचला निम्ना गंभीरा नाभिर्यस्मिन् तत् दलवत् अश्वत्थपत्रसंकाशं सुंदरं यस्य तं ॥२४॥
चार्वः अंगुलयो ययोस्ताभ्यां उन्नीय आकृष्य धयंतं पिबंतं ॥२५॥ हृत्पद्मं च विलोचनं च प्रोत्फुल्लानि तानि यस्य सः । अद्भुत

भावं अत्याश्चर्यरूपं तेन शंकितः संत्रापितं प्रभुं पुरः प्रससार समीपं गतः ॥२६॥

अदः इदं तु गतं यथापुरा प्रलयात्सर्वं न्यस्तं दृष्ट्वा च अतीवविस्मितः सन्मुह्यत् ॥२७॥ कृत्स्नशो ऽदर्शं न पपंच यत्तिरवमित्यादिना ककुभो
खे दिशः पुराणि आकरान् खेटान् कर्वटकं आमान् व्रजान् गोकुलानि ॥ आश्रमांश्च वर्णांश्च तेषां वृत्तीः प्रवृत्तयः ॥२८॥ नानायुगानि

तावच्छिशोर्वै श्वसितेन भार्गवः सोऽन्तःशरीरं मशको यथाविशत् ॥ तत्राप्यदो न्यस्तमचष्ट कृत्स्नशो यथा पुरामु
ह्यदतीवविस्मितः ॥२७॥ खं रोदसी भगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभः सुरासुरान् ॥ वनानि देशा
न्सरितः पुराकरान्खेटान्व्रजानाश्रमवर्णवृत्तयः ॥२८॥ महान्तिभूतान्यथ भौतिकान्यसौ कालं च नानायु
गकल्पकल्पनं यत्किंचिदन्यद्व्यवहारकारणं ददर्श विश्वं सदिवावभासितं ॥२९॥ हिमालयं पुष्पवहां च
तां नदीं निजाश्रमं तत्र ऋषीनपश्यत विश्वं विपश्यन्श्वसिताच्छिशोर्वै बहिर्निरस्तो न्यपतल्लयाब्धौ ॥३०॥
तस्मिन्पृथिव्याः ककुदि प्ररूढं वटं च तत्पर्णपुटे शयानं तोकं च तत्प्रेमसुधास्मितेन निरीक्षितोऽपांगनिरी
क्षणेन ॥३१॥ अथ बालकं वीक्ष्य नेत्राभ्यां धिष्ठितं हृदि ॥ अभ्ययादतिसंक्लिष्टः परिष्वक्तुमधोक्षजं ॥३२॥

कल्पाश्च कल्पयन्तीति ते वा कल्प्यत इति तथा तं कालं च सदिव परमार्थ इवत्यवभासितं तेनैव ॥२९॥ ३० ॥ वटं च तोकं च वीक्ष्य तस्य
प्रेमणा सुधातुल्यस्मितयुक्तेनापांगनिरीक्षणेन निरीक्षितः सन् ॥३१॥ अथ तं बालकमधोक्षजं परिष्वक्तुमभ्ययादिति द्वयोरन्व
यः ॥ कथंभूतं नेत्राभ्यां हृदि धिष्ठितं ॥३२॥

तावत्सरिं घंगत्वा भात्सर्वमेव कृत्स्नस्यां तर्हितो वभूव तद्दृश्यमेव फलत्वेन स्थितं ।। अनीशेनेति दैवः तेन निर्मिता ईहा क्रीडा यथेति
३३ तमन्वंतर्हितं भगवंतमनु वटः सलिलं लोकसंप्लवश्च तिरोधायि अंतर्हितः स च स्वाश्रमे एव यथापूर्वं स्थित इति ।३४। इति द्वा
दशे नवमः ॥ द्वाभ्यां शिव आगत्य मुनेस्तुष्टो वरान्ददान् तेन सा कमति प्रीत्या समाभाष्य सभाजयत् ।२। ज्ञानकाशया ज्ञानवत्स्यका

तावत्स भगवान्साक्षात् योगाधीशो गुहाशयः ।। अंतर्दधे ऋषेः सद्यो यथेहानीशनिर्मिता ।३३। त
मन्वथ वटो ब्रह्मन्सलिलं लोकसंप्लवः तिरोधायि क्षणात्सोपि स्वाश्रमे पूर्ववत्स्थितः ।।३४।। इ
ति श्रीभागवते महापुराणे द्वादशस्कंधे मायादर्शनो नाम नवमोध्यायः ।। ९ ।। सूत
उवाच ।। स एवमनुभूयेदं नारायणविनिर्मितं ।। वैभवं योगमायायास्तमेव शरणं ययौ ।। १ ।। मार्कंडे
य उवाच ।। प्रपन्नोस्म्यंघ्रिमूलं ते प्रपन्ना [illegible] यदं हरे यन्मायया पि विबुधा मुह्यंति ज्ञानकाशया ।। २ ।।
सूत उवाच ।। तमेवं निभृतात्मानं वृषेण दिवि पर्यटन् रुद्राण्या भगवान्रुद्रो ददर्श स्वगणैर्वृतः ।। ३ ।। अ
थोमा तमृषिं वीक्ष्य गिरिशं समभाषत ।। पश्येमं भगवन्विप्रं निभृतात्मेंद्रियाशयं ।। ४ ।। निभृतोदझषव्रातो वाता
पाये यथार्णवः कुर्वस्य तपसः साक्षात्संसिद्धिं सिद्धिदो भवान् ।। ५ ।।

शमानयाल्पज्ञजनं विनाविद्वांसोऽयस्य तु वमा यया ज्ञा
निनो वयमित्यहंकारेण मुह्यंतीत्यर्थः ।२। श्रीनारायण एवस्य मायादर्शिनश्चांतं श्रीशिवरूपेण सांत्वयामास तदाह तमेवेत्यादि । ३४
नानिभृतात्मानं समाहितचित्तं रुद्राण्या भवान्या ।३। निभृता निश्चला आत्मेंद्रियाशया देहेंद्रियमनांसि यस्य तं ।४। निभृतं निश्चलमुद
कं झषव्रातश्च यस्मिन्सः संसिद्धिं फलं साक्षात्कुरु प्रकटीकुरु यतो भवान्सिद्धिदः ।५।

आशिषः अभ्युदयलक्षणाः ॥ उत स्वित् अत्र हेतुः भक्तिमिति ॥ ६ ॥ संवदिष्यामः संवादंकरिष्यामः । ७ ॥ सत्वतांगतित्वेहेतुः ईशानइ
ति ॥ ८ ॥ रुद्धाधियोऽन्तःकरणस्य वृत्तयो येन सः । ९ । १० ॥ न केवलं बहिरेव । आत्मन्यपिप्राप्तंशिवंविचक्ष्यविस्मितः ॥ कथंप्राप्तंसहसा

श्रीभगवानुवाच ॥ नैवेच्छत्याशिषःक्वापिब्रह्मर्षिर्मोक्षमप्युत ॥ नक्तिंपरांभगवतिलब्धवान्पुरुषेऽव्यये ॥ ६ ॥
अथापिसंवदिष्यामोभगवान्नेतेनसाधुना ॥ अयंहिपरमोलाभोनृणांसाधुसमागमः ॥ ७ ॥ सूत उवाच ॥
इत्युक्त्वातमुपेयायभगवान्सात्वतांगतिः ॥ ईशानःसर्वविद्यानामीश्वरःसर्वदेहिनां ॥ ८ ॥ तयोराग
मनंसाक्षादीशयोर्जगदात्मनोः ॥ नवेदरुद्धधीवृत्तिरात्मानंविश्वमेवच । ९ ॥ भगवांस्तदभिज्ञायगिरि
शोयोगमायया ॥ आविशत्तद्गुहाकाशंवायुश्छिद्रमिवेश्वरः ॥ १० ॥ आत्मन्यपिशिवंप्राप्तंतडित्पिंगजटाध
रं ॥ त्र्यक्षंदशभुजंप्रांशुमुद्यन्तमिवभास्करं ॥ ११ ॥ व्याघ्रचर्माम्बरंशूलंधनुरिष्वसिचर्मभिः ॥ अक्षमालाडमरु
ककपालपरशुंसह ॥ बिभ्राणंसहसाभातंविचक्ष्यहृदिविस्मितः ॥ १२ ॥

अकस्मादेवहृदिभातं ॥ कथंभूतंतडित्वत्पिशंगाजटाधारयतीतितथातं ॥ त्रीण्यक्षाणियस्यतंशूलादिभिःसहाऽक्षमालादी
न्बिभ्राणमित्यन्वयः अक्षमालादीनांद्वंद्वैक्यं । १२ ॥

विस्मय एवं केवलं हि दर्शनमाह ॥ किमिदमिति सोमयानु मया सुहागतं रुडं दृष्ट्वा ॥२३॥ ततो नमाम ॥२४॥ पूर्णकामत्वं व्यसनं हि ।
येन त्वया गोष्ठीन्नि दृष्टं भवति ॥२५॥ निर्गुणत्वेन वचनमस्करोति नमः शिवायेति गुणाय सत्वाधिष्ठात्रे अत एव प्रसृडयति

किमिदं कुत एवेति समाधेर्विरतो मुनेः ॥ नेत्रे उन्मील्य ददृशे सगणं सोमयागतं ॥२३॥ रुडं त्रिलोकैकगुरुं
ननाम शिरसा मुनिः । तस्मै सपर्यामदधात्सगणाय सहोमया स्वागतासनपाद्यार्घ्यगंधस्रग्धूपदीपकैः ॥२४॥ आह चा
त्मानुभावेन पूर्णकामस्य ते विभोः । करवाम किमीशान येनेदं निर्वृतं जगत् ॥२५॥ नमः शिवाय शांताय सत्वाय प्रमृ
डाय च ॥ रजोजुषेथ घोराय नमस्तुभ्यं तमोजुषे ॥२६॥ सूत उवाच ॥ एवं स्तुतः स भगवानादिदेवः सतां गतिः प
रितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत ॥२७॥ भगवानुवाच ॥ वरं वृणीष्व नः कामं वरदेशा वयं त्रयः ॥ अमोघं द
र्शनं येषां मर्त्यो यद्विंदतेऽमृतं ॥२८॥ ब्राह्मणाः साधवः शांता निःसंगा भूतवत्सलाः ॥ एकांतभक्ता अस्मासु निर्वै
राः समदर्शिनः ॥२९॥ सलोका लोकपालास्तान्वंदंत्यर्चंत्युपासते ॥ अहं च भगवान्ब्रह्मा स्वयं च हरिरीश्वरः ॥३०॥

सुखयतीति तथ्यात्तस्मै ॥२६॥ ॥२७॥ नोस्मत्तः त्रयः ब्रह्मा विष्णुमहेश्वराः यतयेभ्यः ते वयं ॥२८॥ वरदानादिना भवत्सेवैवास्माभिः क्रिय
ते न त्वनुग्रहः । जगद्घत्वाद्भवतामिति ब्राह्मणान्स्तौति ब्राह्मणा इत्यादिना येन साधवः सदाचाराः शांता मत्सरादिरहिताः निःसंगाः

निष्कामाः ॥२९॥ तत्वविवत्तं केवलकं कल्याणकैः ॥३०॥ ३५

पूजितमत्वे हे त्वं तरमाह॥ नेति॥ अएवपि अन्यएग मात्रमपि वसूते पश्यंति। ततस्मात् एवंभूतान् युष्मान् ईमहि नज्जेम।२१॥ ब्राह्मणेभ्यः
ब्राह्मणान् आत्मसमाधानं चित्तैकाग्र्यं तपः आलोचनं स्वाध्यायः॥ अध्ययनं संयमः। वागादिनियमः तेः।२२॥२३। किंच अवणादि

नतेमय्यच्युते ऽेचभिदा मएकपि वसूते॥ नात्मतन्ध्यज्जनस्थापित युष्मान्वयमीमहि॥२१॥ नह्यन्मया निती
र्यो निनस्वाम्भ्वेतनोज्झिताः॥ नेपुनंत्युरुकालेन यूयंदर्शनमात्रतः॥२२॥ ब्राह्मणेभ्यो नमस्यामो ये ऽस्म
ऽपं त्रयीमयं॥ बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः॥२३॥ श्रवणाद्दर्शनाद्वापि महापातकिनो ऽपि व
शुद्धेरन्नंत्यजाश्चापि किमु संभाषणादिभिः॥२४॥ सूत उवाच॥ इति चंडललामस्य धर्म्मगुह्योपबृंहितं
वचो मृतायनमश्विनोत्मप्यत्कर्णयोः पिवन्॥२५॥ सचिरंमाययाविष्टो भ्रामितः कर्षितो भृशं॥ शिववा
गमृतध्वस्तक्लेशपुंजस्तमब्रवीत्॥२६॥ ऋषिरुवाच॥ अहो ईश्वरवेर्येयं दुर्विभाव्या शरीरिणां॥ यन्नमंती शि
तन्यानि स्तुवंति जगदीश्वराः॥२७॥

स्वादि॥२४॥ चंडो ललामो भूषणं यस्य तस्य धर्मरहस्ययुक्तं अमृतास्पदं वचः॥ कर्णाभ्यां पिवन् तालप्यत् स्थूलमिति नामस्य तकर्णो
योरमृतायनइति वान्वयः।२४॥ शिवस्य वागेवामृतं तेन ध्वस्तः क्लेशपुंजो यस्य सः।२५॥ इयं लीला दुर्विभाव्या अवितर्क्या या
ईशितव्यानि स्वनियम्यानि यानि भूतानि जगदीश्वरा यं नमंति स्तुवंति चेति।२७॥

भा० स्कं० ६ अथवा लोकसंग्रहमात्रमेतदित्याह धर्ममिति प्रवक्तारोपि यत्स्वयं देहिनां धर्ममाचरंति ।२८॥ नन्वेतत्त्वत्प्रवृत्तावतिरस्कारकं कथं
मया क्रियते तत्राह ॥ नेति । एतावता लोकसंग्रहमात्रेणैतेन मनादिभिः ॥ कथंभूतैः स्वमायामयी वृत्तिर्येषु तैः । भगवतो मायिन
स्तवानुभावो न दुष्येत् यतः प्रसिद्धस्य मायायिनः कुहकं । यथा कपटं यथा तये तानि न मनादीनि ॥ अतस्तस्य यथा कु
हकैरात्मानुभावो न दुष्येतेति पाठे नेकारस्य द्वयोतेऽनुषंगः ॥२९॥ मायाचेष्टितं प्रपंचयति ॥ स इति ॥ स त्वमद्वक्रम य

धर्ममाहयितुं प्रायः प्रवक्तारश्च देहिनां ॥ आचरंत्यनुमोदंते क्रियमाणं स्तुवंति च ॥२८॥ नैतावता भगव
तः स्वमायामयवृत्तिभिः ॥ न दुष्येतानुभावस्तैर्मायिनः कुहकं यथा ॥२९॥ स त्वेदं मनसा विश्वमात्मनानुप्रवि
श्य यः ॥ गुणैः कुर्वद्भिराभाति कर्त्तेव स्वप्नदृग्यथा ॥३०॥ तस्मै नमो भगवते त्रिगुणाय गुणात्मने ॥ केवलाया
द्वितीयाय गुरवे ब्रह्ममूर्त्तये ॥३१॥ कं वृणे नु परं त्वद्दर्शनात् यद्दर्शनात्पूर्णकामः सत्यकामः पुमान्भवेत् ॥३२॥ श्री
वरमेकं वृणेथापि पूर्णात्कामाभिवर्षणात् ॥ भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ॥३३॥ सूत उवाच ॥ इत्य
र्चितोऽभिष्टुतस्तेन मुनिना सूक्तया गिरा ॥ तमाह भगवान्सर्वः सर्वेषां चाभिनंदितः ॥३४॥

येत्यविद्याचेष्टिते दृष्टांतः ।३०। त्रिगुणत्वेपि नटीववत्तदभिभूततायकिंतु गुणानामात्मने नियंत्रे ॥३१। वरं वृणीष्वेति यदुक्तं त ३६
त्राह । कमिति । वरं दर्शनं यस्य तस्मात्त्वत्तः । परं किंनु वरं वृणे यस्य तव दर्शनात्पूर्णकामः सर्वानंदसंदोहरूपः सत्यकामः य
थेष्टप्राप्तसर्वानंदः ॥३२॥३३॥ वरदानाय स्वयमेव प्रवृत्तः शावेयानुमयाचाभिनंदितः अनुमोदितः सन्नाह ।३४॥

कामोयंसर्वोपिश्रन्यस्त्वपुराणपयशइत्यादि ॥ श्रसवर्चेस्विनस्तेभयादित्युत्तरेणान्वयः ॥ यतस्त्वमधोक्षजेभक्तिमान ॥ ३५ ॥ ३६ ॥ त
स्यकर्मेतपश्रादिमुनेः ॥ पुरानुभूतंचभगवन्मायावैभवंतच्चकथयन ॥ २० ॥ श्रवासोमहायोगमहिमायेनसः ॥ ३८ ॥ एतन्मार्कं
डेयस्यचरितंतेनानुभूतंचभगवन्मायावैभवंतेऽनुवर्णितं ॥ ३९ ॥ नन्वेवमप्यस्मत्कुलोत्पन्नस्यासप्तकल्पायुर्मृकंडेस्तच्चमा
नंविरुद्धमेवतत्राह ॥ एतन्मार्कंडेयेनानुभूतंभगवन्मायावैभवंनानाकल्परूपेकादाचित्कई श्वरेछयातस्यैवाकस्मि

कामस्तेऽयंमहर्षेस्तुभक्तिमांस्त्वमधोक्षजे ॥ श्राकल्पांतात्यशःपुण्यमजरामरतातथा ॥ ३५ ॥ ज्ञानंत्रैकालिकं
ब्रह्मन्विज्ञानंचविरक्तिमत ॥ ब्रह्मवर्चस्विनोभूयात्पुराणाचार्यताऽस्तुते ॥ ३६ ॥ सूत उवाच ॥ एवंवरान
समुनयेदत्वागात्त्र्यक्ष ईश्वरः ॥ देव्यैतत्कर्मकथयन्ननुभूतंपुरामुने ॥ ३७ ॥ सोप्यवाप्तमहायोगमहिमा
भार्गवोत्तमः ॥ विचरत्यधुनाप्यद्धाहरावेकांततांगतः ॥ ३८ ॥ अनुवर्णितमेतत्ते मार्कंडेयस्यधीमतः ॥
अनुभूतंभगवतोमायावैभवमद्भुतं ॥ ३९ ॥ एतत्केचिदविद्वांसोमायासंसृतिमात्मनः ॥ अनाद्यावर्तितंनॄणां
कादाचित्कंप्रचक्षते ॥ ४० ॥ यएवमेतद्भृगुवर्यवर्णितंरथांगपाणेरनुभावभावितंसंश्रावयेत्संशृणुयादुतातावुभौतयोनेकर्माशयसंसृतिर्भवेत ॥ ४१ ॥ इतिभागवतेमहापुराणेद्वादशस्कंधेदशमोध्यायः ॥ १० ॥

कंनतुसर्वसाधारणंएतत्केचित ॥ अनादिवह्रुकालं आवर्तितंदैवयुगसहस्रद्वयमानेनपुनःपुनःपरिवर्तितंप्रचक्षतेकेतेन्रा
णांसंसृतिसर्गप्रलयादिलक्षणंआत्मनोभगवतोमायेत्येवमविद्वांसः स्त्रमायाशिशोः श्वासोच्छ्वासाभ्यांसप्तकल्पस्तदुदर
प्रवेशादिर्गमतः । सप्तकल्पत्वेतल्लक्षणमात्रेणेतिवदंतिश्रतोनविरोधइत्यर्थः ॥ ४० ॥ संश्रृणुयात्संश्रावयेद्वायोतावुभौतयोः

ना०ह्रां०
३२

यो

एकादशीतु एतादृशी महापुरुषवर्णितं ॥ २ ॥ तेषां हस्यचाख्यानं प्रतिमासं पृथक् पृथक् ॥ २ ॥ येनाऽमर्त्यत्वमाप्नोति मर्त्यो सो भागीवोत्तमः
तं एकादशीतिक्रियांगसांगोपांगादिकल्पितं ॥ २ ॥ अथ येति ॥ हे भागवतयतो भवान् समस्ततंत्रराद्धांते तत्ववित् ॥ २ ॥ वक्तव्यमाह तांत्रिका
इति ॥ परिचर्यायां उपासनायां विषये केवलस्य चेतनस्य घनस्य अंगानि पादादीनि उपांगानि गुरुडादीनि आयुधानि सुदर्शनादी
नि आकल्पाः कौस्तुभादयः ते यांद्ध देव्यं तद्यथा कल्पयंति येष्वतत्वैः ॥ कल्पयंति ॥ २ ॥ तन्नो वर्णयेति ॥ ३ ॥ गुरूपदेशागम्यत्वा

शौनक उवाच ॥ अथेमम् अर्थं पृच्छामो भगवंतं बहुवित्तमं ॥ समस्ततंत्रराद्धांते भवान् भागवततत्ववि
त् ॥ २ ॥ तांत्रिकाः परिचर्यायां केवलस्य श्रियः पतेः ॥ अंगोपांगायुधाकल्पं कल्पयंति यथैव यैः ॥ २ ॥ तन्नो
वर्णय भद्रं ते क्रियायोगं बुभुत्सतां ॥ येन क्रियानैपुणेन मर्त्यो यायाद् अमर्त्यतां ॥ ३ ॥ सूत उवाच ॥ नमस्कृ
त्य गुरून् वक्ष्ये विभूतीर् वैष्णवीर् अपि ॥ याः प्रोक्ता वेदतंत्राभ्यां आचार्यैः पद्मजादिभिः ॥ ४ ॥ मायाद्यैर् न
वभिस्तत्वैः सविकारमयो विराट् ॥ निर्मितो दृश्यते यत्र सचित्के भुवनत्रयं ॥ ५ ॥

एतस्यार्थस्य तत्र नमस्कारपूर्वकमाह ॥ नमस्कृत्वेति विभूतीः विराट् विग्रहाद्याः ॥ ४ ॥ अंगादिकल्पनां भ्रूरादिभिर्द्रष्टुं ज्ञायितुं प्रथ
मतावद्यथा कुल्पयंतीति प्रश्नस्य वैराजरूपे ए तत्तु तरं वक्तुं विराड्विग्रहमाह मायाद्यैः प्रकृतिसूत्रमहद्अहंकारपंचतन्मा
त्रैर्नवभिस्तत्वैः विकारैरेकादशेंद्रियाणि पंचमहाभूतानीति षोडशात्मकमयो विराट् स प्रसिद्धो निर्मितः ॥ यत्र विराजि सचि
त्के चेतनाधिष्ठिते भुवनत्रयं दृश्यते अनेनांगादिकल्पनासौलभ्यं दर्शितं ॥ ५ ॥ ३१

एतद्वै पौरुषं रूपं पुरुषस्य वैराजस्य रूपमेवेश्वरेणाधिष्ठितत्वात्तदभेदविवक्षया तस्य रूपमुच्यते ॥ अंगाकल्पनामाह भूः पादा
विस्यादित्रिभिः भूराद्यनुवादेन भगवत्याद्यादिभावना विधीयते ६ प्रजननं मेढ्रं अपानः पायुः ॥७॥८॥ अनुक्तां मस्तकं एव
गृह्यमित्याह यावानयं व्यष्टिपुरुषः स्वमानतः । सप्तवितस्तिसंख्यया वसन्निदेशेन मितः । ९ । भूषणादीन्याह ॥ कौ।

एतद्वै पौरुषं रूपं भूः पादौ द्यौः शिरो नभः ॥ नाभिः सूर्योऽक्षिणी नासे वायुः कर्णौ दिशः प्रभो ॥६॥ प्रजा
पतिः प्रजननमपानो मृत्युरीशितुः ॥ तद्बाहवो लोकपाला मनश्चंद्रो भ्रुवौ यमः ॥७॥ लज्जोत्तरोऽध
रो लोभो दंता ज्योत्स्ना स्मयो भ्रमः रोमाणि भूरुहा भूम्नो मेघाः पुरुषमूर्द्धजाः ॥८॥ यावानयं वै पुरुषो
यावत्या संस्थया मितः ॥ तावानसावपि महापुरुषो लोकसंस्थया ॥९॥ कौस्तुभव्यपदेशेन स्वात्म
ज्योतिर्बिभर्त्यजः ॥ तत्प्रभा व्यापिनी साक्षात् श्रीवत्समुरसा विभुः ॥१०॥ स्वमायां वनमालाख्यां नाना
गुणमयीं दधत् ॥ वासश्छंदोमयं पीतं ब्रह्मसूत्रं त्रिवृत्स्वरं ॥११॥ बिभर्ति सांख्यं योगं च देवो मक
रकुंडले ॥ मौलिं पदं पारमेष्ठ्यं सर्वलोकाभयंकरं ॥१२॥ अव्याकृतमनंताख्यमासनं यदधिष्ठितः ॥ ध
र्मज्ञानादिभिर्युक्तं सत्वं पद्ममिहोच्यते ॥१३॥

स्तुभेत्यादि स्वात्मज्योतिः ॥ शुद्धजीवचैतन्यं ॥ यातस्य कौस्तुभ।
स्य प्रभा तामेव श्रीवत्सं बिभर्ति ॥१०॥ त्रिवृत्स्वरं त्रिमात्रं प्रणवं ॥११॥ पारमेष्ठ्यं पदं ब्रह्मलोकं ॥१२॥ अव्याकृतं प्रधानं यत् ।
अधिष्ठितः । अधिष्ठाय स्थितः । तदासनं भूतं पद्मं सत्वं सत्वगुणः ॥१३॥

भा०द्वा०
३८

मुख्यतत्त्वं प्राणतत्त्वं प्राणो वै मुख्य इति स्मृते ॥ दरवरं शंखं ।१४॥१५॥ आकूतीः क्रियाशक्तियुक्तं मनः ॥ अस्य रथस्याभिव्यक्तिं
बहिरभिव्यक्तरूपमुद्रया धृतया अर्थक्रियात्मतां वरदाभयदादिरूपत्वं विभर्ति तन्मुद्रया तया तथा भावयेदित्यर्थः ।१६॥ मंड
लं देवयजनं देवयजनभूमिः सूर्यमंडलत्वेन भावयेदित्यर्थः । अंतर्बहिर्मंडलवादी दीक्षासंस्कार आत्मनः ॥ गुरुकृतां मंत्रदीक्षा
मेव आत्मनस्तत्र यज्ञयोग्यताभावयेदित्यर्थः परिचर्येति भगवतस्तां परिचर्यां स्वस्य सकलपापहन्याय एवं रूपां भावये

ओजःसहोबलयुतं मुख्यतत्त्वं गदां दधत् ॥ अपां तत्त्वं दरवरं तेजस्तत्त्वं सुदर्शनं ।१४॥ नभोनिभं
नभस्तत्त्वमसिं चर्म तमोमयं । कालरूपं धनुः शार्ङ्गं तथा कर्ममयेषुधिः ॥१५॥ इंद्रियाणि शरानाहु।
राकूतीरस्य स्यंदनं ॥ तन्मात्राण्यस्याभिव्यक्तिं मुद्रयार्थक्रियात्मतां ॥१६॥ मंडलं देवयजनं
दीक्षा संस्कार आत्मनः ॥ परिचर्या भगवत आत्मनो दुरितक्षयः ॥१७॥ भगवान् भगशब्दार्थं लीला।
लाकमलमुद्वहन् ॥ धर्मं यशश्च भगवान् चामरव्यजनेऽभजत् ॥१८॥ आतपत्रं तु वैकुंठं द्विजा धा
माकुतोभयं ॥ त्रिवृद्वेदः सुपर्णाख्यो यज्ञं वहति पूरुषं ॥१९॥

इत्यर्थः ।१७॥ पूर्वमासनपद्ममुक्तं इदानीमंतःस्थं पद्ममाह भगवानिति भगवच्छब्दार्थं ऐश्वर्यादिषाड्गुण्यं ॥१८॥ हे द्वि
जाः एकवचनांतो वा पाठः । अकुतोभयं कैवल्यं धाम गृहं समभजत् यद्वा वैकुंठस्य विशेषणं अकुतोभयं यद्धामेति। ३८
त्रिवृत् ऋग्यजुःसामरूपो वेदः सुपर्णोऽसि गरुत्मांस्त्रिवृत्ते शिर इत्यादिमंत्रलिंगात् यज्ञरूपं यज्ञो वै विष्णुरिति।

अनपायिनी हरेः शक्तिः तत्र हेतुः साक्षादात्मनः स्वस्वरूपस्य चिद्रूपत्वात्तस्मात्तद्भेदादित्यर्थः ॥ तंत्रमूर्त्तिः पंचरात्राद्यागमरू
पः ये ऽणिमादयोऽष्टौ गुणास्ते हरेर्द्वारपालानंदादयः ॥२०॥ तस्यैव चतुर्व्यूहोपासनामाह ॥ वासुदेवादिशब्दैः पुरुषः श्रीना
रायण एव स्वयं मूर्त्तिर्नैदेहोपास्य इत्यभिधीयते ॥२१॥ तस्यैवाध्यात्मनि चतुर्द्धोपासनमाह ॥ स एव भगवान्विश्वादिशब्दैर्वृ
त्तिभिर्जाग्रदाद्यवस्थाभिः परिभाव्यते तदुपाधीनाह ॥ अपरोवाद्याः इंद्रियं मनः आशयस्तदुभयसंस्कारयुक्तमज्ञानं

अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः ॥ विष्वक्सेनस्तंत्रमूर्त्तिर्विदितः पार्षदाधिपः ॥ नंदा
द्यो ष्टौ द्वाःस्थाश्च ते ऽणिमाद्या हरेर्गुणाः ॥ वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयं ॥ अ
निरुद्ध इति ब्रह्मन्मूर्त्तिव्यूहोभिधीयते ॥२१॥ स विश्वस्तैजसः प्राज्ञस्तुरीय इति वृत्तिभिः ॥ अ
र्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते ॥२२॥ अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयं ॥ बिभ
र्त्ति स्म चतुर्मूर्त्तिर्भगवान्हरिरीश्वरः ॥२३॥

ज्ञानं त्रितयमाहितैः ॥२२। उक्तचतुर्व्यूहद्वयोपासनेपि पूर्वोक्तमंगाद्युपासनामाह ॥ अंगेति । अंगादिभिरुपलक्षितो भ
गवान्हरिर्वासुदेवादिरूपचतुर्मूर्त्तिः सन्विश्वादिचतुष्टयं बिभर्त्ति स्म विश्वादिनावेऽपि तन्नियंतुस्तस्य नजीवत्वमित्या
ह ॥ विश्वादिचतुष्टयं बिभ्रदपि भगवानीश्वर एवेति ।२३॥

तस्य ब्रह्मादित्रिमूर्त्तितामाह ॥ द्विजऋषभेति सएव एव भगवन् ब्रह्मयोनिर्वेदस्यकारणमित्यादिहेतुत्रयं ॥ वस्तुतो भेदाभावे
ऽपि विश्वगतं माययासृजति हरति यातीति कृत्वा आख्यया ब्रह्मादिरूपपाप्नोरताहः । अनाद्यनन्तज्ञानोऽपि विवृ
त इव भिन्न इव निरुक्तः शास्त्रेषु न तु भिन्नः अत्र विद्वदनुभवं प्रमाणयति यतस्तत्परैरात्मत्वेनेव लभ्यत इति । २४ । यस्येद

द्विजऋषभ स एष ब्रह्मयोनिः स्वयंदृक् स्वमहिमपरिपूर्णो मायया च स्वयैतत् ॥ सृजति हरति याती
त्याख्ययाऽनावृताक्षो विवृत इव निरुक्तस्तत्परैरात्मलभ्यः ॥ २४ ॥ श्रीकृष्ण कृष्णसख वृष्ण्यृषभा
वनिध्रुग्राजन्यवंशदहना ॥ ऽनपवर्गवीर्य गोविंद गोपवनिताव्रजभृत्यगीततीर्थः श्रवः श्रवण
मंगल याहि भृत्यान् ॥ २५ ॥ य इदं कल्य उत्थाय महापुरुषलक्षणं ॥ तच्चित्तः प्रयतोजप्त्वा वेदं गुहाशयं
॥ २६ ॥

मुपासनमुक्तं तं श्रीकृष्णं प्रार्थयते ॥ कृष्णसखा अर्जुनस्य सखे वृष्णिऋषभ अवनिद्रुहो ये राजन्याः तेषां वंशस्य दहन अन
पवर्गं अक्षीणं वीर्यं यस्य ॥ गोपवनितानां व्रजाः सम सहाभृत्या नारदादयः ते[illegible] गीतं तीर्थं भूतं श्रवः कीर्तिर्यस्य श्रव
णं मंगलं यस्य । २५ ॥ एतद्रूपमात्रस्यापि ब्रह्मज्ञानफलमित्याह ॥ य इति ॥ कल्ये उषःकाले यत्तच्चित्तः प्रयतः शुचिस्सं
संजप्त्वा गुहाशयं हृदिस्थं ब्रह्म सम्पश्यति । २६ ॥

मंडलं देवयजनमित्युक्त्या बुद्धिमानतः ॥ सर्वात्मनिर्ह्यहप्रसंगेनरविव्यूहोऽत्र पृच्छ्यते ॥ २ ॥ शुक इति पंचभिः यदाह । तथाऽन्ये च ऋषयो
गंधर्वाप्सरसो नागा ग्रामण्यो यातुधाना देवा इत्येकैकशो गणाः ॥ सप्तसंख्यादिना सौर्ये संबंधी सप्तानां गणः । २७ । तेषां सप्ता-
नामधीश्वरैः तत्तन्मासाधिकृतसूर्यैर्वो ॥ व्यूहं विभागं ॥ २८ ॥ तत्र तावत् व्यूहनिरूपणे तु प्रथमं स्वरूपमाह ॥
। अनाद्यविद्यया मायया आश्रयं सूर्यः ॥ लोकतंत्रः लोकयात्राप्रवर्तकः ॥ २९ ॥ अतस्तत्क्रियाभेदोपाधिकमेव नानात्वं न स्व-

शौनक उवाच ॥ शुको यद् आह भगवान् विष्णुराताय शृण्वते ॥ सौरो गणो मासि मासि नाना वसति स-
प्तकः ॥ २७ ॥ तेषां नामानि कर्माणि संयुक्तानामधीश्वरैः ॥ ब्रूहि नः श्रद्दधानानां व्यूहं सूर्यात्मनो
हरेः ॥ २८ ॥ सूत उवाच ॥ अनाद्यविद्यया विष्णोरात्मनः सर्वदेहिनां ॥ निर्मितो लोकतंत्रोऽयं लोकेषु परि-
वर्तते ॥ २९ ॥ एक एव हि लोकानां सूर्य आत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलं ऋषिभिर्बहुधो-
दितः ॥ ३० ॥ कालो देशः क्रिया कर्ता करणं कार्यमागमः ॥ द्रव्यं फलमिति ब्रह्मन् नवधोक्तोऽजया हरिः
॥ ३२ ॥

तरित्याह । एक एवेति ॥ सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतेः ॥ जगदात्मादिकृत् सृष्टिकर्ता हरिरेव सूर्यः ॥ स च स-
र्वासां वेदोक्तक्रियाणां मूलं स नन्तेनोपाधिना बहुधोक्तः ॥ ३० । कालरूपधारिणो हरेर्ह्यो देशादिस्वरूपं भेदं क्रियोपाधिकं
दर्शयितुं प्रथमं सर्वकर्मफलप्रवर्तये मायाकृतं नवधाभेदमाह । कालइति । कालः प्रातरादिः देशः समादिः देशः समा-
दिः । क्रिया अनुष्ठानं ॥ कर्ता ब्राह्मणादिः करणं स्रुगादि ॥ कार्यं यागादि ॥ आगमः मंत्रादिः । द्रव्यं व्रीह्यादि फलं स्वर्गादि ३२

भा०द्वा०
६० तत्रचकालरूपधारीभागवान्वा एथकसरति ॥ मधादिषुचैत्रादिषुलोकतंत्रायलोकयात्रानिर्वाहाय ॥ ३२ ॥ तानेवगणानाह
धातेतिद्वादशभिः ॥ धातासूर्यः कृतस्थलीअप्सराहेतिः राक्षसः वासुकिर्नागः । रथकृतयक्षः । पुलस्त्यऋषिः तुंबु-
रुगंधर्वः नयंतिअनुवर्त्तयंति ॥ ३३ ॥ अथौजायक्षः प्रहेतिराक्षसः ॥ नारदोगंधर्वः । कच्छनीरोनागः माधवेवैशाखे ॥ ३४

मध्वादिषुद्वादशसुभगवान्कालरूपधृक् ॥ लोकतंत्रायचरतिपृथक्द्वादशभिर्गणैः
॥ ३२ ॥ धाताकृतस्थलीहेतिर्वासुकीरथकृन्मुने ॥ पुलस्त्यस्तुंबुरुरितिमधुमासंनयंत्यमी ॥
॥ ३३ ॥ अर्यमापुलहोथौजाः प्रहेतिःपुंजिकस्थलीनारदःकच्छनीरश्चनयंत्येतेस्ममाध
वं ॥ ३४ ॥ मित्रोऽत्रिःपौरुषेयोऽथतक्षकोमेनकाहहाः ॥ रथस्वनइतिह्येतेशुक्रमासंनयंत्यमी
॥ ३५ ॥ वसिष्ठोवरुणोरंभासहजन्यस्तथाहुहूः ॥ शुक्रश्चित्रस्वनश्चैवशुचिमासंनयंत्य-
मी ॥ ३६ ॥ इंद्रोविश्वावसुःश्रोताएलापत्रस्तथांगिराः ॥ प्रम्लोचाराक्षसोवर्योनभोमासंनयंत्य
मी ॥ ३७ ॥ विवस्वानुग्रसेनश्चव्याघ्रआसारणोभृगुः ॥ अनुम्लोचाशंखपालोनभस्याख्यंन
यंत्यमी ॥ ३८ ॥

मित्रः सूर्यः पौरुषेयोराक्षसः रथस्वनोयक्षः शुक्रोनागः । चित्रस्वनोराक्षसः । शुचिमा सं आषाढं ॥
३६ ॥ इंद्रः सूर्यः विश्वावसुर्गंधर्वः । श्रोतायक्षः एलापत्रोनागः वर्योराक्षस इतिस्वयमेवव्याख्यातंनभोमासंश्रावणं ६०
३७ ॥ विवस्वान्सूर्यः उग्रसेनोगंधर्वः व्याघ्रोराक्षसः । आसारणोयक्षः शंखपालोनागः नभस्याख्यंभाद्रपदं ॥ ३८ ॥

धनंजयो नागः वातो राक्षसः सुषेणो गंधर्वः। सुरुचिर्यक्षः। तपोमासं माघं मासक्रमातिलंघनं कौर्मोक्तादिक्रमानुसरे
ण॥ वेदितव्ये तु मासक्रमे ऐणाक्तिः॥ ऋचित्रामुख्ययस्तु कल्प्यते देनेति ज्ञेयं॥७९॥ ऋतुर्यक्षः वर्चो राक्षसः। पर्जन्यः सूर्यः सेन
जित् अप्सरा॥ विश्वावसुर्गंधर्वः ऐरावतो नागः तपस्याख्य फाल्गुने॥८०॥ अंशुः सूर्यः अंसई तिवा याठः। तार्क्ष्यो य
क्षः ऋतसेनो गंधर्वः विद्युच्छत्रुः। राक्षसः महाशंखो नागः सहोमासं मार्गशीर्षे॥८१॥ ऋचीतनयो उमदग्नि। केव क

एषा धनंजयो वातः सुषेणः सुरुचिस्तथा॥ घृताची गौतमश्चेति तपोमासं नयंत्यमी॥७९॥
ऋतुर्वै वर्चो भरद्वाजः पर्जन्यः सेनजित्तथा विश्वश्वऐरावतश्चैव तपस्याख्यं नयंत्यमी॥८०॥ अं
शांशुः कश्यपस्तार्क्ष्य ऋतसेनस्तथोर्वशी॥ विद्युच्छत्रुर्महाशंखः सहोमासं नयंत्यमी॥८१॥ त्वष्टा
ऋचीकतनयः कंबलश्च तिलोत्तमा॥ ब्रह्मापेतोऽथ शतजित् धृतराष्ट्र इषंभराः॥८२॥ भगः स्फूर्ज
रिष्टनेमिरूर्णश्च आयुश्च पंचमः॥ कर्कोटकः पूर्वचित्तिः पुष्यमासं नयंत्यमी॥८३॥ विष्णुरश्वत
रो रंभा सूर्यवर्चा च सत्यजित्॥ विश्वामित्रो मखापेत ऊर्जमासं नयंत्यमी॥८४॥

लो नागः ब्रह्मापेतः राक्षसः शतजित् यक्षः धृतराष्ट्रो गंधर्वः इषंभराः अश्विन पालकाः॥८२॥ भगः सूर्यः स्फूर्जो राक्षसः
अरिष्टनेमि गंधर्वः। ऊर्णो यक्षः आयुः ऋषिः कर्कोटको नागः॥८३॥ विष्णुरादित्यः अश्वतरो नागः सूर्यवर्चो गंध
र्वः। सत्यजित् यक्षः मखापेतो राक्षसः ऊर्जो मासः कार्तिकं॥८४॥

एते वादित्यादयः कौर्म्मे विभक्तोक्ताः ॥ धातार्यमा च मित्रश्च वरुणश्चेंद्र एव च । विवस्वानथ पूषा च पर्ज्जन्यश्चांशु
रेव च ॥ ततस्त्वष्टा च विष्णुश्च आदित्या द्वादश स्मृताः ॥१॥ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोथांगिरा भृगुः । गोतमोथ
भरद्वाजः कश्यपः क्रतुरेव च ॥ जमदग्निः कौशिकश्च मुनयो ब्रह्मवादिनः ॥२॥ रथकृच्चारिष्टनेमिर्ग्रामणिश्चर
थस्वनः रथचित्रस्वनः । श्रोतास्त्र रुणाः सेनजित्तथा ॥ तार्क्ष्ये श्चारिष्टनेमिश्च क्रतुजित्सत्यजित्तथा एते पन्नाः स्व
त्यहेति प्राहेति रक्षः पौरुषेयो वधस्तथा ॥ वर्यो व्याघ्रस्तस्तथापश्च वायुः विद्युद्दिवाकरः । ब्राह्मापेतश्च विप्रेंद्र

एता भगवतो विष्णोरादित्यस्य विभूतयः ॥ स्म
रतां संध्ययोर्नृणां हरंत्यंहो दिने दिने ॥ ६५ ॥

यज्ञापेतश्च राक्षसाः वासुकिः कच्छनीरश्च तक्षकः सर्पपुंगवः । एलापत्रः । शंखपालस्तथैरावतसंज्ञितः । धनंजयो
महापद्मस्तथा कर्कोटको द्विजा ॥ कंबलोश्वतरश्चैव वहंत्येवं यथाक्रमं ॥ तुंबुरुर्नारदो हाहा हूहूर्विश्वावसुस्त
थापरः चित्रसेनस्तथोर्णायु धृतराष्ट्रो द्विजोत्तमाः ॥ सूर्यवर्चा द्वादशेति गंधर्वा गायतां वराः । कृतस्थलाप्सरो वर्या
तथान्या पुंजिकस्थली मेनका सहजन्या च प्रम्लोचा च द्विजोत्तमाः ॥ अनुम्लोचा घृताची च विश्वाची चोर्वशी तथा ६१
पा ॥ अन्या च पूर्वचित्तिः स्यादन्या चैव तिलोत्तमा ॥ रंभा चेति द्विजश्रेष्ठास्तथैवाप्सरसः स्मृता इति । ६५ ॥

धनंजयो नागः वातो राक्षसः । सुषेणो गंधर्वः सुरुचिर्यक्षः तयो मासं माघं सामकं मातिलं घनं कौमोत्कादिक्रमानुसारेण
वैष्णवे तु मासक्रमेणोक्तिः । क्वचित्नामव्यत्ययस्तु कल्पभेदात् ॥ एतेषां पृथक्कर्माणि निरूपयति । द्वादशात्मस्वपीति त्रिभिः । असौ
देवः सूर्यः षड्भिर्गंधर्वादिभिः । अस्खलनस्य समतामाचरन् अभ्युभां मतिं तनुते गायत्र्यादिभिः । तेन सूचितः ॥ ६६ ॥ तल्लिंगैः
सूर्यप्रकाशकैः ॥ ६७ ॥ उन्नह्यंति दृढं बध्नंति ग्रामण्यो यक्षाः । नैऋता राक्षसाः ॥ ६८ ॥ किंच वालखिल्याद्यं इति एलंडति ।

द्वादशात्मस्वपि मासेषु देवोसौ षड्भिरस्य वै ॥ चरन्समंतात्तनुते परत्रेह च सन्मतिं ॥ ६६ ॥ साम ऋग्यजुर्भिस्तल्लिं
गैर्ऋषयः संस्तुवंत्यमुं ॥ गंधर्वास्तं प्रगायंति नृत्यंत्यप्सरसोग्रतः ॥ ६७ ॥ उन्नह्यंति रथं नागा ग्रामण्यो रथ
योजकाः ॥ नोदयंति रथं पृष्ठे नैऋता बलशालिनः ॥ ६८ ॥ वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयो मलाः
पुरतोभिमुखं यांति स्तुवंति स्तुतिभिर्विभुं ॥ ६९ ॥ एवं ह्यनादिनिधनो भगवान्हरिरीश्वरः ॥ कल्पे कल्पे स्व
मात्मानं व्यूह्य लोकानवत्यजः ॥ ५० ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे एकादशोध्यायः ॥
॥ ११ ॥ श्रीसूत उवाच ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ॥ ब्रह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्ये सना
तनान् ॥ १ ॥

सू० मासं तत्रैव विभज्य ये ॥ ४९ ॥ ५० ॥ व्यूह्य विभज्य ॥ इति द्वादशे एकादशोध्यायः ॥ ११ ॥ द्वादशे तु पुराणोक्त
सर्वार्थानुक्रमः कृतः प्रथमस्कंधमारभ्य प्राधान्येन समासतः तदेवमस्मिन्पुराणे कृतानर्थान्संक्षेपतो वर्णयिष्यन् ध
र्मादीन्प्रणमति ॥ नम इति ॥ महते हरिभक्तिलक्षणाय । ब्राह्मणेभ्यः ॥ ब्राह्मणान् सनातनान् धर्मान् निस्तु पलक्षणपुराणो

पुरुषत्वेनुच्चितं ॥ श्रवणादियोग्यं ॥ २ ॥ एतत्प्रपंचयति ॥ अत्रेति ॥ भगवान् ऐश्वर्यादिषड्गुणः ॥ साक्षात्संकीर्तितः इ-
तिदेवताकांडार्थः ॥ ३ ॥ ब्रह्मकांडार्थमाह ॥ अत्रब्रह्मेति ॥ गुह्यं निर्गुणं प्रभवाप्ययं ॥ प्रभवत्यस्मादिति प्रभवं अप्येत्य-
स्मिन्निप्यप्ययं तत्र चेतच्च ॥ अनेनाश्रयश्चाश्रयो दर्शितः ॥ विज्ञानसंयुतं अपरोक्षज्ञानपर्यंतं ज्ञानं ॥ तदुपाख्यानं

एतद्वः कथितं विप्रा विष्णोश्चरितमद्भुतं ॥ भवद्भिर्यदहं पृष्टो नराणां पुरुषोचितं ॥ २ ॥
अत्र संकीर्तितः साक्षात्सर्वपापहरो हरिः ॥ नारायणो हृषीकेशो भगवान्सात्वतांपतिः ॥ ३ ॥ अ-
त्र ब्रह्म परं गुह्यं जगतः प्रभवाप्ययं ॥ ज्ञानं च तदुपाख्यानं प्रोक्तं विज्ञानसंयुतं ॥ ४ ॥ भक्तियोगः ।
समाख्यातो वैराग्यं च तदाश्रयं ॥ पारीक्षितमुपाख्यानं नारदाख्यानमेव च ॥ ५ ॥

तत्ज्ञानमुपाख्यायते प्रकाश्यते येन च तत् ज्ञानसाधनमित्यर्थः ॥ ४ ॥ कर्मकांडार्थमाह ॥ भक्तियोगश्च साध्यसाधनरूपः ॥
तदाश्रयं भक्तियोगेन निष्पाद्यं इति ॥ एवं सामान्यतो निरूप्येदानीं द्वादशस्कंधप्रकरणार्थमनुक्रामति ॥ पारीक्षितमुपा-
ख्यानं परीक्षिज्जन्मादि तत्स्तावायनारदाख्यानं च ॥ ५ ॥ ६२

ब्रह्मर्षेर्ब्राह्मणोत्तमस्य इति प्रथमस्कंधार्थः ॥६॥ उत्क्रांतिरर्चिरादि गतिः । प्राधानिकः । प्रधानकार्यविराड्रूपः अग्रतः । आदि
तः महदादिक्रमेणोत्पत्तिः इति द्वितीयार्थः ।७॥ महापुरुषस्य संस्थितिः । वलयेत् स्त्रीमवास्थाने ।८। प्राकृतिकः । प्रकृति

प्रायोपवेशो राजर्षेर्विप्रशापात्परीक्षितः ॥ शुकस्य चैव ब्रह्मर्षेः संवादश्च परीक्षितः ॥६॥
योगधारणयोत्क्रांतिः संवादो नारदाजयोः ॥ अवतारानुगीतं च सर्गः प्राधानिकोऽग्रतः ॥७॥ वि
दुरोद्धवसंवादः क्षत्तृमैत्रेययोस्ततः ॥ पुराणसंहिताप्रश्नो महापुरुषसंस्थितिः ॥८॥ ततः प्रा
कृतिकः सर्गः सप्तवैकृतिकाश्च ये ॥ ततो ब्रह्मांडसंभूतिर्वैराजः पुरुषो यतः ।९॥ कालस्य
स्थूलसूक्ष्मस्य गतिः पद्मसमुद्भवः ॥ भुव उद्धरणेंऽभोधेर्हिरण्याक्षवधो यथा ॥१०॥ ऊर्द्धति
र्यगवाक्सर्गो रुद्रसर्गस्तथैव च ॥ अर्द्धनारीनरस्याथ यतः स्वायंभुवो मनुः ॥११॥ शतरू
पा च या स्त्रीणामाद्या प्रकृतिरुत्तमा ॥ संतानो धर्मपत्नीनां कर्दमस्य प्रजापतेः ।१२॥ अवतारो
हि देवस्य कपिलस्य महात्मनः ॥ देवहूत्याश्च संवादः कपिलेन च धीमता ।१३॥

सर्वो गुणक्षोभरूपः । वैकृतिका महदादयः । चकारादिकारादि च ये तयोस्तेषां च सर्गः । ९॥ गतिः स्वरूपं कर्द्दारणं ॥ उद्ध
रणे ॥१०॥ कद्दम्पान्नारी च नरश्च तस्य ।११॥ संतानो धर्मपत्नीनामिति नवब्रह्मसमुत्पत्तिरित्यस्यानंतरं द्रष्टव्यं ।१३॥

चतुर्थस्कंधार्थमाह ॥ नवब्रह्मणामरीच्यादीनां समुत्पत्तिः संतानः ॥ २४ ॥ पंचमस्कंधार्थमाह ॥ ततः प्रैयव्रतं प्रियव्रतस्य च
रितं ॥ २५ ॥ द्वीपाद्यपवर्णनं प्रथमसंदर्भे पतः ॥ ततो द्वीपादीनां ये गिरयैर्नद्यश्च तेषामुपवर्णनं ॥ पातालनरकादीनां चस्थि

नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनं ॥ ध्रुवस्य चरितं पश्चात्पृथोः प्राचीनबर्हिषः ॥ २४ ॥ नारदस्य च सं
वादस्ततः प्रैयव्रतं द्विजाः ॥ नाभेस्ततोनुचरितमृषभस्य भतस्य च ॥ २५ ॥ ततो द्वीपसमुद्रादिवर्षनद्युप
वर्णनं ॥ ज्योतिश्चक्रस्य संस्थानं पातालनरकस्थितिः ॥ २६ ॥ दक्षजन्म प्रचेतोभ्यस्तत्पुत्रीणां च स
ततिः ॥ यतो देवासुरनरास्तिर्यङ्नगखगादयः ॥ २७ ॥ त्वाष्ट्रस्य जन्मनिधनं पुत्रयोश्चादितेर्द्विजाः ॥ दैत्ये
श्वरस्य चरितं प्रह्लादस्य महात्मनः ॥ २८ ॥ मन्वंतरानुचरितं गजेंद्रस्य विमोक्षणं ॥ मन्वंतरावताराश्च विष्णोर्हे
यशिरादयः ॥ २९ ॥ कौर्म्यं मात्स्यं नारसिंहं वामनं च जगत्पतेः ॥ क्षीरोदमथनं तद्वदमृतार्थे दिवौकसां ॥ ३० ॥ देवा
सुरमहायुद्धं राजवंशानुकीर्तनं ॥ इक्ष्वाकुजन्म तद्वंशः सुद्युम्नस्य महात्मनः ॥ ३१ ॥ इलोपाख्यानमत्रोक्तं तारो
पाख्यानमेव च ॥ सूर्यवंशानुकथनं शशादाद्या नृगादयः ॥ ३२ ॥ सौकन्यं चाथ शर्यातेः ॥ ककुत्स्थस्य च धीम
तः खट्वांगस्य च मांधातुः सौभरेः सगरस्य च ॥ रामस्य कोशलेंद्रस्य चरितं किल्बिषापहं ॥ ३३ ॥ निमेरंगपरित्या
गो जनकानां च संभवः ॥ ३४ ॥ रामस्य भार्गवेंद्रस्य निःक्षत्रीकरणं भुवः ॥ ऐलस्य सोमवंशस्य ययातेर्नहुष
स्य च ॥ ३५ ॥
तिः श्वनैवनकनिवर्त्तकमजामिलोपाख्यानं गृहीतं ततः पराचीनं ॥ २६ ॥ षष्ठार्थमाह दक्षजन्मेति ॥ २७ ॥ सप्तमार्थमाह ॥ पुत्रयोश्चेति
॥ २८ ॥ अष्टमार्थमाह ॥ मन्वंतरानुचरितमिति क्वचित्कस्य चिरनुक्तिः स्पुक्रमोक्तिश्च नक्तिरसानुकूलत्वेनेति द्रष्टव्यं ॥ २९ ॥ ३० ॥ नवमार्थमाह

॥ नैः ॥ त्यदेवकल्मषेतरसेर्वैतक्सुवंकामां ॥ १८ ॥ विनिरकस्थानतोदिना ॥ ३६

तत्सुतस्य भीष्मस्य ॥२६॥२७॥ दशमार्थमाह ॥ तस्य कर्माणीति ॥ पूतनाया असुसहितस्य स्तन्यपयसः पानं सह भ्रातुः ससखस्य ॥२९

दौष्यंतेर्भरतस्यापि शांतनोस्तत्सुतस्य च ॥ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशोऽनुकीर्तितः ॥२६॥ यत्रावतीर्णो भगवा
न्कृष्णाख्यो जगदीश्वरः ॥ वसुदेवगृहे जन्म ततो वृद्धिश्च गोकुले ॥२७॥ तस्य कर्माण्यपाराणि कीर्ति-
तान्यसुरद्विषः ॥ पूतनासुपयःपानं शकटोच्चाटनं शिशोः ॥२८॥ तृणावर्तस्य निष्पेषस्तथैव बकवत्स
योः ॥ धेनुकस्य सहभ्रातुः प्रलंबस्य च संक्षयः ॥२९॥ गोपानां च परित्राणं दावाग्नेः परिसर्पतः ॥ दमनं का
लियस्याहेर्महाहेर्नंदमोक्षणं ॥३०॥ व्रतचर्या तु कन्यानां यत्र तुष्टोऽच्युतो व्रतैः ॥ प्रसादो यज्ञपत्नीभ्यो
विप्राणां चानुतापनं ॥३१॥ गोवर्द्धनोद्धरणं च शक्रस्य सुरभेरथ ॥ यज्ञाभिषेकं कृष्णस्य स्त्रीभिः क्रीडा च रा
त्रिषु ॥३२॥ शंखचूडस्य दुर्बुद्धेर्वधोऽरिष्टस्य केशिनः ॥ अक्रूरागमनं पश्चात्प्रस्थानं रामकृष्णयोः ॥३३॥
व्रजस्त्रीणां विलापश्च मथुरालोकनं ततः ॥ गजमुष्टिकचाणूरकंसादीनां च यो वधः ॥३४॥ मृत
स्यानयनं सूनोः पुनः सांदीपने गुरोः ॥ मथुरायां निवसता यदुचक्रस्य यत्प्रियं ॥ कृतमुद्धवरामा-
भ्यां युतेन हरिणा द्विजाः ॥३५॥ जरासंधसमानीतसैन्यस्य बहुशो वधः ॥ घातनं यवनेंद्रस्य कुशस्थल्या
निवेशनं ॥३६॥ आदानं पारिजातस्य सुधर्मायाः सुरालयात् ॥ रुक्मिण्या हरणं युद्धे प्रमथ्य द्विषतो हरेः
॥३७॥ हरस्य जृंभणं युद्धे बाणस्य भुजकृंतनं ॥ प्राग्ज्योतिषपतिं हत्वा कन्यानां हरणं च यत् ॥३८॥

॥३०॥ यज्ञाभिषेकं यज्ञस्य जातस्याभिषेकश्च तत्यो दैवैक्यं ॥३१॥३२॥३३॥ द्विषतः शत्रून्प्रमथ्य ॥३७॥ ये च शंबरादयस्तेषां ॥३८॥ ॥

ना० द्वा० माहात्म्यं प्रभावः॥३९॥४०॥एकादशार्थमाह॥विप्रशापेति॥धर्मविनिर्णयः वर्णाश्रमधर्मनिश्चयः॥४१॥मर्त्यपरित्यागः म
४४ नुष्यत्वस्यांतर्धानं॥४२॥द्वादशार्थमाह पुरेति युगलक्षणं तदनुरूपा वृत्तिश्चेत्यर्थः॥त्रिविधा॰ प्राकृतिकी नैमित्तिकी नित्या

चैद्यपौंड्रकशाल्वानां दंतवक्त्रस्य दुर्मतेः॥ शंबरः द्विविदः पीठो मुरः पंचजनादयः॥३९॥ माहात्म्यं च
वधस्तेषां वाराणस्याश्च दाहनं॥ भारावतरणं भूमेर्निमित्तीकृत्य पांडवान्॥४०॥ विप्रशापापदेशेन
संहारः स्वकुलस्य च॥ उद्धवस्य च संवादो वासुदेवस्य चाद्भुतः॥४१॥ यत्रात्मविद्या ह्यखिला प्रोक्ता धर्म
विनिर्णयः॥ ततो मर्त्यपरित्याग आत्मयोगानुभावतः॥४२॥ युगलक्षणवृत्तिश्च कलौ नॄणामुप
प्लवः॥ चतुर्विधश्च प्रलय उत्पत्तिस्त्रिविधा तथा॥४३॥ देहत्यागश्च राजर्षेर्विष्णुरातस्य धीम-
तः॥ शाखाप्रणयनमृषेर्मार्कंडेयस्य सत्कथाः॥४४॥ महापुरुषविन्यासः सूर्यस्य जगदात्मनः॥
॥४४॥ इति चोक्तं द्विजश्रेष्ठा यत्पृष्टोऽहमिहास्मि वः॥ लीलावतारकर्माणि कीर्तितानीह सर्वतः॥
॥४५॥

श्चेति॥४३॥ ऋषेर्व्यासस्य च विन्यास इत्यर्थः॥४४॥ इति चोक्तमिति चकारादपि॥ वः युष्माभिरिह यत्पृष्टोऽस्मि तदुक्त ४४
मिति॥ किमेवं नानार्थकथनेन तत्राह॥ लीलेति सर्वतः तत्तदर्थे कीर्त्तनद्वारेणेत्यर्थः॥४५॥

तत्कीर्त्तनेनापिकिमित्यपेक्षायांतत्फलमाहद्वाभ्यां ॥ पतितः कूपादिषुस्खलितः सोपानादिषु । आर्त्तोदुःखितः क्षुत्वा
क्षुतंकृत्वाविवशोपि ॥ ४६ ॥ संकीर्त्तमानः यद्वा श्रुतोऽनुभावोयस्यसः पुंसांचित्तंप्रविश्यपतिः शेषंदुःखंविधुनोतीता
ति ॥ हीतिसतामनुभवंप्रमाणयति ॥ अर्कोगिरिगुहादिध्वांतंननिवर्त्तयतीत्यपरितोषाद्दृष्टांतरमाह । अतिवा तां

पतितःस्खलितोवार्तःक्षुत्वावाविवशोब्रुवन् ॥ हरयेनमइत्युच्चैर्मुच्यतेसर्वपातकात् ॥ ४६ ॥ संकी
र्त्यमानोभगवाननंतः ॥ श्रुतानुभावोव्यसनंहिपुंसां ॥ प्रविश्यचित्तंविधुनोत्यशेषंयथातमोर्कोऽभ्र
मिवातिवातः ॥ ४७ ॥ मृषागिरस्ताह्यसतीरसत्कथानकथ्यतेयद्भगवानधोक्षजः ॥ तदेवसत्यंतदु
हैवमंगलंतदेवपुण्यंभगवद्गुणोदयं ॥ ४८ ॥ तदेवरम्यंरुचिरंनवंनवंतदेवशश्वन्मनसोमहो
त्सवं ॥ तदेवशोकार्णवशोषणंनृणांयदुत्तमश्लोकयशोनुगीयते ॥ ४९ ॥

तोऽभ्रमिवेति । ४७ । हरिकीर्त्तनमेवमहाफलंतद्व्यतिरिक्तंसर्वंमिथ्यालायमात्रमितिप्रपंचति ॥ मृषागिरइतिचतुर्भिः मृषा
गिरः मिथ्यावाचः असतीः असत्यः असताकथायासुताः ॥ यत्यासु ॥ उत्तमश्लोकस्ययशोः ॥ नुगीयतइतियत्तदेव
सत्यंतदेवहिमंगलं ॥ हइतिहेयंभगवद्गुणानामभ्युदयोयस्मात् । ४८ ॥ नवनवंयथाभवतितथारुचिप्रदंमहानुत्सवोय
स्मात् ॥ ४९ ॥

भा० द्वा० चित्राणिपदानियस्मिन् तदपि ।। जगत्पवित्रयतीतितथा तद्धरेर्यशो न प्रगृणीते न वर्णयेत् तद्वचः । ध्वांक्षतीर्थं काकतुल्य
६५ नराणां रतिस्थानं न तु हंसैर्ज्ञानिभिः । सेवितं तत्र हेतुः यत्रेति ।।५०।। सवाग्विसर्गः स एव वचः प्रयोगः जनताघसंप्लवः ज
नसमूहाघनाशकः यद्यस्मात् तान्येव अन्यैः ।। कीर्त्यमानानि शृण्वंति ।। श्रोतरि सति गायंति नो चेत् स्वयमेव गृणं
ति ।।५१।। इदानीं कर्मादरादपि भगवत्कीर्तनादिष्वादरः कर्तव्य इत्याह नैःकर्म्यं च ब्रह्म तत्प्रकाशकं यत्ज्ञानं ।। या

न तद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित ।। तत ध्वांक्षतीर्थं न तु हंससेवितं यत्रा
ऽच्युतस्तत्र हि साधवोऽमलाः ।।५०।। स वाग्विसर्गो जनताघसंप्लवो यस्मिन्प्रतिश्लोकमबद्धव ।
त्यपि ।। नामान्यनंतस्य यशोंकितानि यत् शृण्वंति गायंति गृणंति साधवः ।५१।। नैष्कर्म्य
मप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरंजनं ।। कुतः पुनः शश्वदभद्रमीश्वरे न ह्यर्पितं
कर्म यदप्यनुत्तमं ।।५२।। यशः श्रियामेव परिश्रमः परो वर्णाश्रमाचारतपः श्रुतादिषु ।। अविस्मृ
तिः श्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ।५३।।

तो निरंजनं निरुपाधि निवर्त्तकं तदप्यच्युतभक्तिवर्जितं चेत् न शोभते नापरोक्षपर्यंतं भवतीत्यर्थः ।। ईश्वरे न चेदर्पितं तर्हि
यदनुत्तमं सर्वोत्तमम् अपि कर्म तदपि पुनः कुतः शोभते ।। यतः शश्वत्साधनकाले च अभद्रं दुःखात्मकं किंच ।। वर्णा
श्रमाचारादिषु यः । परो महान् परिश्रमः स यशः ।। श्रियां युक्तायामेव ।। कीर्तिः संपत्तिश्च केवलं ।। न परमपुरुषार्थः गुणानुवा ६५
दादिभिस्तु श्रीधरपादपद्मयोरविस्मृतिर्भवति ।।५३।।

ना

ततः किमत आह ॥ अविस्मृतिरिति ॥ हरिणोति नाशयति ॥ ५५ ॥ अथेदानीमात्मनात्मानं चाभिनं दृष्टाह ॥ यूयमिति द्वाभ्यां ॥ हे द्विजाग्र्याः यद्यस्मात् आत्मन्येतः ॥ करणे श्रीनारायणं विवेश प्रशस्व ऋग्जात ॥ संभावनायां लोट् ॥ अतो भूरि भागाः ॥ वैकुंठपुरुषाः कथंभूतम् अखिलात्मभूतं सर्वांतर्यामिणं ॥ अत एव देवं सर्वोपास्यं ॥ अदेवं नदेवो अन्यो

अविस्मृतिः कृष्णपदारविंदयोः हरिणोत्यभद्राणि शमं तनोति च ॥ सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तं ॥ ५४ ॥ यूयं द्विजाग्र्या बत भूरिभागा यच्छश्वदात्मन्यखिलात्मभूतं ॥ नारायणं देवमदेवमीशमजस्रभावा भजताविवेश्य ॥ ५५ ॥ अहं च संस्मारित आत्मतत्वं श्रुतं पुरा मे परमर्षिवक्त्रात् ॥ प्रायोपवेशे नृपतेः परीक्षितः सदस्यृषीणां महतां च शृण्वतां ॥ ५६ ॥ एतद्वः कथितं विप्राः कथनीयोरुकर्मणः ॥ माहात्म्यं वासुदेवस्य सर्वाशुभविनाशनं ॥ ५७ ॥ य एवं श्रावयेन्नित्यं यामक्षणमनन्यधीः ॥ श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेव सः ॥ ५८ ॥ द्वादश्यामेकादश्यां वा शृण्वन्नायुष्यवान्भवेत् ॥ पठत्यनश्नन्प्रयतस्ततो भवत्यपातकी ॥ ५९ ॥ पुष्करे मथुरायां च द्वारवत्यां यतात्मवान् ॥ उपोष्य संहितामेतां पठित्वा मुच्यते भयात् ॥ ६० ॥ देवता मुनयः सिद्धाः पितरो मनवो नृपाः ॥ यच्छंति कामान्शृण्वतो यत्रकीर्तयतो नृणां ॥ ६१ ॥ ऋचो यजूंषि सामानि द्विजोधीत्यानुविंदते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ॥ ६२ ॥

यस्य तं ॥ कुतः ईशं ॥ यद्वा यस्मात् यूयं भूरिभागाः तपआदिसंपन्नाः ततो नारा तेनात् ॥ ६२ ॥ एवं भजतेति विधिः ॥ ५५ ॥ मेम या श्रुतं ॥ ५६ ॥ एतत्पुराणकीर्तनादिफलं प्रपंचयितुमह ॥ एतद्व इत्यष्टभिः ॥ ५७ ॥ यामं क्षणं चेत्यर्थः आत्मानमेव साक्षात्पुनाति किं तु स्वा

सहस्रनाम ॥ ६१ ॥

ना० द्वा०
९६

ऋ आद्यधीत्य द्विजो मधुकुल्यादि यदनुविंदते ॥ तत्फलमेतां पठित्वा अनुविंदतइति ॥ ६२ ॥ किंच ॥ प्रोक्तमिति ॥ ६३ ॥ दांतस्यनुद
धिमेखलां पृथ्वीं सर्वं प्रियरायैः ॥ ६४ ॥ अस्य पुराणस्यैवं प्रभावातिरेके कारणमाह ॥ कलिमलानां संहतिं संमृहं कालयति वि
नाशयतीति तथा ॥ इतरत्र शास्त्रांतरे ॥ ६५ ॥ शास्त्रप्रतिपादितं भगवंतं नमस्करोति ॥ तमिति द्वाभ्यां जगदुदयस्थितिसंयमात्म
नोरजआदयो शक्तयो यस्य तं ॥ द्युपतिभिर्द्वैरं पितुखसित आज्ञातः स्तवस्तोत्रं यस्य तं ॥ ६६ ॥ उपचिताभिः ॥ उद्रिक्ताभि

ऋचो यजूंषि सामानि द्विजोऽधीत्यानुविंदते ॥ मधुकुल्या घृतकुल्याः पयःकुल्याश्च तत्फलं ॥ ६२ ॥ पुराणसंहिता
मेतामधीत्य प्रयतो द्विजः । प्रोक्तं भगवता यत्तु तत्पदं परमं व्रजेत ॥ ६३ ॥ विप्रोऽधीत्याप्नुयात्प्रज्ञां राजन्यो
दधिमेखलां ॥ वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात ॥ ६४ ॥ कलिमलसंहतिकालनोऽखिले
पि शो हरिरितरत्र न गीयते ह्यभीक्ष्णं ॥ इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसंगैः ॥ ६५ ॥
म तमहमजमनंतमात्मतत्त्वं जगदुदयस्थितिसंयमात्मशक्तिं ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुरव
व सितस्तवमच्युतं नतोस्मि ॥ ६६ ॥ उपचितनवशक्तिभिः स्व आत्मन्युपरचितस्थिरजंगमालयाय ॥ भगव
त उपलब्धिमात्रधाम्ने सुरऋषभाय नमः सनातनाय ॥ ६७ ॥ स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावोऽप्यजि
तरुचिरलीलाकृष्टसारस्तदीयं ॥ व्यतनुत कृपया यस्तत्त्वदीपं पुराणं तमखिलवृजिनघ्नं व्याससूनुं न
तोस्मि ॥ ६८ ॥ इति श्रीभागवते महापुराणे द्वादशस्कंधे द्वादशोऽध्यायः ॥ १२ ॥

नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः । स्व आत्मन्येवोपरचितं स्थिरं जंगमं चालयो यस्य तस्मै भगवते ॥ ६७ ॥ श्री
गुरुं नमस्करोति । स्वसुखेनैव निभृतं पूर्णं चेतो यस्य सः तेनैव व्युदस्तो अन्यस्मिन्भावो यस्य तं । तथाभूतोऽप्यजितस्य रुचिराभिर्ली

[illegible] द्वादशोऽध्यायः ॥ १२ ॥

सर्वपुराणसंख्यादीनुपवर्णयिष्यन्तत्स्तुतिपार्थ्यं देवं शरणमेति ॥ यमिति तत्त्ववेदैः स्वतत्त्वं तिस्तुवंति नुपनिषच्छस्पाकारांतत्वं छंदोनु
रोधेन ध्यानेनावस्थितं तेनिश्चलं तद्गतं यन्मनस्तेन यस्यांतं न विदुः सुरासुरगणाः ॥ १ ॥ क्षीरोदमथनादौ दुर्द्धीयत्वमेवपृष्ठे शोयितुं कूर्मा
वतारं यत्रा ग्राह्यगिरिं स्वास्थयते ॥ पृष्ठे भ्राम्यन् अमंदोगगिरिगुरुमंदरगिरिस्तस्य पृष्ठस्तत्तदा मग्नाणितेः ॥ कंडूयमानात्तेन सुखेन निद्रा
लोः निद्राशीलस्य ॥ यथोश्वासानिलानां संस्कारस्ते या कलाश्चलेशाः तदनुवर्त्तनवशात् जलनिधेरंभसो यातं तं विश्राम्यति

सूत उवाच ॥ यं ब्रह्मावरुणेंद्ररुद्रमरुतः स्तुन्वंति दिव्यैः स्तवैर्वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ १ ॥ पृष्ठे
भ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पांतु वः ॥ यत्संस्का
रकलानुवर्तनवशाद्वेलानिभेनांभसां यातायातमतंद्रितं जलनिधेर्नाद्यापि विश्राम्यति ॥ २ ॥ सूत उवाच
पुराणसंख्यासंभूतिमस्य वाच्यप्रयोजने ॥ दानं दानस्य माहात्म्यं पाठादेश्च निबोधत ॥ ३ ॥ ब्राह्मं दशसहस्राणि पा
द्मं पंचोनषष्टि च ॥ श्रीवैष्णवं त्रयोविंशच्चतुर्विंशति शैवकं ॥ ४ ॥ दशाष्टौ श्रीभागवतं नारदं पंचविंशतिः ॥ मा
र्कंडं नव वाह्नं च दशपंच चतुः शतं ॥ ५ ॥ चतुर्दश भविष्यं स्यात्तथा पंचशतानि च ॥ दशाष्टौ ब्रह्मवैवर्तं लिं
गमेकादशैव तु ॥ ६ ॥ चतुर्विंशति वाराहमेकाशीतिसहस्रकं ॥ स्कांदं शतं तथा चैकं वामनं दश कीर्तितं ॥ ७ ॥

ननु समुद्रक्षोभे दैवतं तन्न संस्कारवशात् तत्राह वेलाक्षोभस्तस्य निभेण मिषेण पुराणसंख्या तासां समाहारं च ॥ अस्य तु श्री
भा[illegible]गतस्य वाच्य विषयः प्रयोजनं च ॥ दानं च तस्य पाठादेश्च माहात्म्यं चानिबोधत ॥ त्रयोविंशत् त्रयोविंशति चतुर्विंशति
सहस्राणि शैवकं शिवपुराणं ॥ ४ ॥ वा नुः अग्निपुराणं दशपंचसहस्राणि चत्वारिंशतानि स्कांदं शताधिके काशी

भा०द्वा०
६७

सौपर्णं गारुडं पुराणं ॥ एकोनविंशत् एकोनविंशति ॥ माहाभारतं त्विति इतिहासः रामायणं च ऋषिप्रोक्तं काव्यं अतः पुराणानां संदोहः
समूहः अथ तु लक्षसंख्याक एव इदानीमस्य वाच्य त्रयोदशानां दीनं दर्शयितुमाह । तत्रेत्यादिना ॥ ९ ॥ १० ॥ हरिलीलाकथानां वृतः स
कोमैस सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ॥ एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु ८ ॥ एवं पुराणसंदो
हस्य लक्षं स्तुतं दाहृतः ॥ तत्राष्टादशसाहस्रं श्रीभागवतमिष्यते ॥ ९ ॥ इदं भगवता पूर्वं ब्रह्मणे नाभिपंक
जे ॥ स्थिताय भवभीताय कारुण्यात्संप्रकाशितं ॥ १० ॥ आदिमध्यावसानेषु वैराग्याख्यानसंयुतं ॥ हरिलीलाक
थाव्रातामृतानंदितसत्सुरं ॥ ११ ॥ सर्ववेदांतसारं यत् ब्रह्मात्मैकत्वलक्षणं ॥ वस्त्वद्वितीयं तन्निष्ठं कैव
ल्यैकप्रयोजनं ॥ प्रोष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितं ॥ ददाति यो भागवतं स याति परमां गतिं ॥ १३ ॥
राजन्ते तावदन्यानि पुराणानि सतां गणे ॥ यावद्भागवतं नैव श्रूयतेऽमृतसागरं ॥ १४ ॥ सर्ववेदांतसारं हि
श्रीमद्भागवतमिष्यते ॥ तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित् ॥ १५ ॥ निम्नगानां यथा गंगा देवानाम
च्युतो यथा ॥ वैष्णवानां यथा शंभुः पुराणानामिदं तथा ॥ १६ ॥ क्षेत्राणां चैव सर्वेषां यथा काशी ह्यनुत्तमा ॥ तथा पु
राणव्रातानां श्रीमद्भागवतं द्विजाः ॥ १७ ॥ श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं ॥ यस्मिन्पारमहंस्यमेक
ममलं ज्ञानं परं गीयते ॥ १८ ॥ यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविःकृतं तच्छृण्वन् विपठन् विचारणपरो भक्त्या वि
एवामृतं तेनानंदिताः । संतः सुराश्च येन तत् ॥ ११ ॥ तन्निष्ठं तद्विषयं ॥ १२ ॥ प्रोष्ठ \ मुच्येन्नरः पद्यां भाद्रपद्यां हेम
सिंहसमन्वितं स्वर्णसिंहासनारूढं ॥ १३ ॥ तदेव एवामृतं तेन तृप्तस्य निर्वृतस्य ॥ १५ ॥ १६ ॥ १७ ॥ पारमहंस्यं परमहंसैः ॥ प्रा

पानैष्कर्म्यं सर्वकर्मोपरमः नस्यात्तच्छ्रवणादिपरो वि
मुच्यते ॥ २८ ॥

६७

श्रीभागवतसंप्रदायप्रवर्त्तकरूपेणभगवद्ध्यानलक्षणंमंगलमाचरति॥ कस्मै ब्रह्मणे अतुलः। असम अयं श्रीभागवतरूपः पुराकल्पादौ॥ ततरूपेणब्रह्मरूपेण। ततरूपिणा। नारदरूपिणा योगींद्रायशुकाय॥ तदात्मनाशुकरूपेण। तत्परंसत्यं। श्रीनारायणाख्यंतत्त्वं धीमहीति॥ २॥ गायत्र्यैवग्रंथोपक्रमंसमुपसंहरन् गायत्र्याख्यब्रह्मविद्येयमितिदर्शयति। तमेवदेवतारूपेणगुरुरूपेणचप्रणमतिद्याभ्यां व्याख्या

कस्मै येनविभासितोयमतुलोज्ञानप्रदीपः पुरातद्रूपेणचनारदायमुनयेकृष्णायतद्रूपिणा॥ योगींद्रायतदात्मनाथ भगवद्राताय कारुण्यतस्तच्छुद्धंविमलंविशोकममृतंसत्यंपरंधीमहि॥ २९॥ नमस्तस्मै भगवते वासुदेवाय साक्षिणे। य इदं कृपया कस्मै व्याचचक्षे मुमुक्षवे॥ २०॥ योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे॥ संसारसर्पदष्टंयो विष्णुरातममूमुचत्॥ २१॥ नवेभवेयथाभक्तिः पादयोस्तवजायते॥ तथाकुरुष्व योगेशानाथस्त्वं मेयतः प्रभो॥ २२॥ नामसंकीर्तनं यस्य सर्वपापप्रणाशनं॥ प्रणामोदुःखशमनस्तंनमामिहरिंपरम्॥ इति श्री भागवते महापुराणे द्वादशस्कंधे त्रयोदशोध्यायः॥ १३॥

नुवात्॥ २१॥ नावार्थदीपिकामेतांभगवद्भक्तवत्सलः। श्रीपरानंदपादाब्जभृंगश्रीः श्रीधरोकरोत्॥ १॥ स्ववालचपलालापैः स्खलितालापरिनर्त्तिनैः॥ प्रीयतांपरमानंदनेहरिसद्गुरुः स्वयं॥ २॥ श्रीपरानंदसंप्रीत्यैगुह्यंभागवतंमया॥ तन्मतेनेदमाख्यातंननुमन्मतिवैभवात्॥ इति श्री भागवते भावार्थदीपिकायांश्रीश्रीधरस्वामिविरचितायांद्वादशस्कंधेत्रयोदशोध्यायः॥ १३॥ संवत् १८ ३० ॥ मासोत्तममासेकार्त्तिकमासेशुक्लपक्षेतीथौ प्रतिपदायां वुधवासरे लिष्यंकृतं वालकृष्णब्राह्मण पठनार्थे श्रीमहंतजी श्रीचैतन्यदास